ॐ

उपाकर्मविधिः

उपयुक्ततयोऽस्याः सम्मितौ विदितायां निकरस्याऽन्यायतमोपहारिणः स्व
प्रकाशाकाशितधर्माधर्माशेषदिशोऽनिः शेषमनीषिमानसाब्जविका
सकस्यैश्वर्यशौर्यौदार्यदयादिगुणगणभूषितवक्षसोऽन्वर्थाभिधस्य
जम्बूकाश्मीराद्यधीशमहाराजश्री ५ रणवीरसिंह[illegible]
आज्ञया
श्रीनगरान्तर्यन्त्रालयेन तदधिकारिसप्तर्षिरायदरस्तवरायेणायन्त्रितः ॥

CC-0 Residence of Asif Sahib Pulwama. Digitized by eGangotri

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ॐ

उपाकर्मविधिः

उद्यत्प्रतापोऽस्मास्तमितारितानिकरस्याऽन्यायतमोपहारिणः स्व
प्रकाशाकाशितधर्माध्वाशेषदिशोनिः शेषमनीषिमानसाब्जविका
सकस्थैर्यशौर्यौदार्यदयादिगुणगणाभूषितवक्षसोऽन्वर्थाभिधस्य

श्रीश्रीश्रीश्रीश्री रणवीरसिंहार्कस्य

आज्ञया

श्रीनगरान्तर्यन्त्रालयेन दधिकारिस्वप्नरायदत्तरामवरायेणायन्त्रितः ॥

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ओं

श्रीगणेशाय नमः

ओं गणाधिपपदद्वंद्वं नत्वा मंगलं च विधाय श्रीमन्महाराजाधिराज श्रीरणवीरसिंहभूपालाज्ञां गृही
त्वा काश्मीरदेशस्थानां द्विजानां वेदोक्तधर्मपरिपालनार्थं यथाबुद्ध्यनुसारेण मया जनार्दनभट्टेन पा
रस्करसूत्रानुसारेण स्नानविध्युत्सर्जनऋषिपूजनतर्पणउपाकर्म च सम्यक् तन्त्रेण लिख्यते त
त्रोत्सर्गकालो निर्णीयते अत्र गृह्यसूत्रं पौषस्य रोहिण्यां मध्यमायां वाष्टकायामध्यायानुत्सृ
जेयुरुदकान्तं गत्वेति सूत्रार्थः पौषमासस्य रोहिणीनक्षत्रयुक्ते अथवा मध्यमाष्टकायां ।
पौषकृष्णाष्टम्यामध्यायानुत्सृजेयुराचार्यशिष्या उत्सृष्टानां छंदसां पुनरुपाकरणं यावत्तावन्न
पठेयुरित्यर्थः अत्र कालान्तरमप्युक्तं गृह्यकारेण तथा च सूत्रं अर्द्धषष्ठान्मासानधीत्योत्सृजे
युरर्द्धसप्तमान्वेति सूत्रार्थः अर्द्धषष्ठान्मासान् अर्द्धः षष्ठो मासो येषु ते अर्द्धषष्ठास्तान् सार्द्धपञ्च।
मासानिति यावत् श्रावणोपाकृतानि छंदांसि माघकृष्णामावस्यापर्यन्तमधीत्योत्सृजेयुः अ
र्द्धसप्तमान्वा अर्द्धः सप्तमो मासो येषु ते अर्द्धसप्तमास्तान् सार्द्धषण्मासानिति यावत् फाल्गुनकृ।
ष्णामावास्यापर्यन्तमधीत्योत्सृजेयुरित्यर्थः तथा च सूत्रार्थकारिका पौषमासस्य रोहिण्यां कृ।
ष्णाष्टम्यामथापि वा उदकान्तं समासाद्य वेदस्योत्सर्जनं चरेदिति दर्शान्ताभिप्रायेण पौषकृ।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

साष्टम्यां पौर्णमास्यां ताभिप्रायेण माघकृष्णाष्टम्यामित्यर्थः वेदस्येति वेदशब्देन मंत्रब्राह्मणयो
रेवोत्सर्गः नाङ्गानां छन्दोवत् सूत्राणीत्यादिना भेदावगमात् अत्र सूत्रोक्तकाले उत्सर्गाख्यक
र्मकर्तव्यमशक्तश्चेत् स्मृत्युक्तकालेपिकुर्वीत तत्र मनुः पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि १ कात्यायनः उत्सर्गश्च तदातिष्ये कुर्यात्त्रीष्यपदेशः
वा तद्वात्वादिगृह्ये विशेषः पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेथवेति पुष्ये तु पुष्यमासे इति
मदनरत्नकारेण व्याख्यातं उपाकर्मकालस्तु सूत्रकारेणोक्तः अथातोध्यायोपाकर्मौषधीनां प्रादु
र्भावे श्रवणेन श्रावण्यां पौर्णमास्यां श्रावणस्य पञ्चमीं हस्तेन वेति सूत्रार्थस्तु प्रयोगे स्फु
टीभविष्यति क्वचिन्निषेधोप्युक्तः संक्रान्तौ ग्रहणे चैव सूतके मृतकेपि वा गणस्नानन्न कुर्वीत
नारदस्य वचो यथा गणस्नान शब्देनोत्सर्गाख्यं कर्म अत एव स्मृत्यर्थसारे उक्तम् कस्मिंश्चि
द्दिने ग्रहणसंक्रान्तिवर्जिते कार्यं कर्मणोनेन लोपः नोत्कर्षः इति इत्युत्सर्गकालं निर्णीय यथा
विधि प्रयोगं कुर्वीत स्नानं च विधिवत्तत्रेत्युक्तत्वाद्यथाविधि स्नानप्रयोगो निरूप्यते तत्रायं प्र
कारः अयं नित्यस्नानस्य कालापकर्षणविधिः न तु कर्माङ्गत्वेन विधानं ततश्च तस्मिन्दिने प्रा
त्याह्निकं माध्याह्निकं स्नानं प्रातरेव कर्तव्यम् न मध्याह्ने दैवकर्मत्वात् प्रथमं सशिष्य आचार्यः प्र
थम प्रयोगे गणपतिपूजनपूर्वकं मातृकार्चनमाभ्युदयिकश्राद्धं यथोक्तं कुर्वीत श्राद्धं गु
रोरेव तथा चरेणुकदीक्षितः पौषमासस्य रोहिण्यां कृष्णाष्टम्यामथापि वा माघस्यायतिथौ न

उपूर्वाह्णोपराह्णे वा उत्सर्गविधिवत्कुर्यात् जलान्ते छन्दसां बहिः नाक्षत्रे मातृपूजादिश्राद्धं।
कृत्वाग्रतः सदेति शुक्ले वाससी परिधाय कृतकेशोपग्रहः कृतप्राणायामो दक्षिण
पाणिनारत्नीन् वाक्संयमवर्ज्जं मो देशकालौ संकीर्त्य उरस्य कंठ्य ता
लव्य मूर्द्धन्य दन्त्य ओष्ठ्यनासिक्य कंठ्यनासिक्य तालव्यनासिक्य मूर्द्धन्यनासिक्य दन्त्यना
सिक्य ओष्ठ्यनासिक्य कंठ्यतालव्य कंठोष्ठ्य दन्तोष्ठ्य जिह्वामूलीयोपध्मानीय ह्रस्वदीर्घप्लु
त स्वरद्विर्भावपरसवर्णविश्लेषणनाम् छंदसा मधीतानामध्यापितानां यातयामत्वनि
वृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थे ह्यशीघ्रोदमुत्सर्जनाख्यं कर्म करिष्ये तदंगत्वेन गणपतिपूज
नमातृकापूजननान्दीश्राद्धिकश्राद्धानि करिष्ये तत्सर्वं गणपत्यादिपूजनं यथोक्तविधिना॥
संपादयेत् ततः स्नानतर्पणपूजोपकरणानि मृदादीनि गृहीत्वा ग्रामात्प्राग्वोदग्वादि।
शि शिष्यैः सह नद्यादिरम्यं जलाशयं प्रतिगच्छेत् देवखातालाभे चतुरः पिण्डानुद्धृत्य परकी
यजलाशये स्नानमाचरेदित्यपि बोद्धव्यं ततस्तीरे स्थित्वा शुभ्रां मृदं शुद्धं गोमयं कु
शान् तिलानक्षतान् सुरभीणि पुष्पाणि दूर्वां अपामार्गं ऋषिस्थापनार्थं पीठं ऋषिपूजना
र्थं गंधं धूपार्थं सुगंधिद्रव्याणि घृतदीपः नानाविधनैवेद्यानि वर्षोद्भवानि फलानि पूगीफ
लानि यज्ञोपवीतानि पृथक्पृथक् स्थापयेत् प्रथमभागेन मृदा पाणिपादानुलेपनं ततः प्र
क्षालितपाणिपादः सपवित्रकरः वद्धत्रिकल्पितासनः वामस्कन्धब्रह्मसूत्र तत

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

स्थले जले चैकैकंपादं कृत्वोपविश्यबाहूजान्वंतराकृत्वा मुक्तौ अङ्गुष्ठकनिष्ठिकेन दक्षिणहस्ते
न फेनबुद्बुदवर्जं स्वच्छं माषमज्जनपरिमितं जलमादाय अङ्गुष्ठमूलस्थब्राह्मेण तीर्थेन ब्राह्ममन्त्रा
वर्त्तिः पिबेत् हस्तस्थयानाभरेखः पादपर्यन्तानि **इदं विष्णुरिति** मेधातिथिऋषिर्विष्णुर्दे॰
गायत्री· अङ्गलेपने॰ ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा स्मार्तक
र्मणि कण्डिकान्तो मन्त्रः सर्वत्र तथाचारेणः गृह्यकर्म स्वयेमन्त्रा ज्ञेया स्वाध्यायपाठतः किञ्च
मध्यमहत्यास्तेन कृतानतविलं विता इति तदा मादिश्रुतो येषु प्रत्यर्कं स्नानमाचरेदिति तथादौ तु
प्रवाहाभिमुखो वा स्नानमाचरेत् ॥ **तथा च नरसिंह पुराणे** ॥ तयास्त्रा।
वत् स्वचस्नायात् प्रतिस्रोतः स्थितो द्विजः यायासमझइगामयस्ता सस्नानं तु यस्मादेव सर्वो।
पिशाचिनः कार्यं विना वाजसनेयिनां इति विशेष वाक्यन्मद्दानद्यां सूर्याभिमुखं स्नानं प्रोक्तं ततः
सूर्याभिमुखः स्थित्वा आपो अस्मानित्यादि देवी वित्यंतेन निमज्जेत् पिबेत् ततो अङ्गुष्ठमूलेन स
र्वाङ्गैः प्रमृज्य अङ्गुष्ठमूलेन हस्तावलम्बान्निसंस्पृशेत् तद्यथा तर्जनी मध्यमानामिकाभिरास्यं अङ्गु
ष्ठतर्जनीभ्यां नासारन्ध्रद्वयं प्रादौदक्षिणं ततो वामं अनामिकाङ्गुष्ठाभ्यां चक्षुषी ताभ्यामेव श्रो
त्रे अङ्गुष्ठकनिष्ठिकाभ्यां नाभिं पाणितलेन हृदयं संकुचितकराग्रेण स्कन्धद्वयं एवं शीर्षं एवं स्ना
नञ्च मनं विधाय सङ्कल्पं कुर्वीत् देशकालौ सङ्कीर्त्य अमुकगोत्रोऽहं कर्मणि स्नानविधिना स्नानं कुर्वे
अत्र प्राणवपूर्विका मन्त्राः पठनीयाः तदुक्तं दाल्भ्यपरिशिष्टे ब्रह्मयज्ञो जपो होमो देवर्षिपितृकर्म।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

णि अनेनोक्तक्रमेण कृते सर्वं ब्रह्ममयं भवेत् सिद्धिकारणं १ तत उरुं हीत्यस्य शुनःशेप ऋषिर्वरुणो देवता त्रिष्टुप्
जलाभिमंत्रणे विनियोगः ॐ उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ अपदे पादा प्र
तिधातवेऽकरुतापवक्ता हृदयाविधश्चित् नमो वरुणायाभिष्ठितो वरुणस्य पाशः १ इति मन्त्रे।
णानेन यमामन्त्रयेत् ततो ये ते शतमिति मंत्रस्य वामदेव ऋषिः वरुणः सविता विष्णुर्विश्वे मरुतः
स्वर्का देवताः त्रिष्टुप् तोयावर्तने विनि० ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता मह
न्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इति मंत्रेण जलं दक्षिणहस्तेन दक्षिणा
वर्तमालोडयेत् ततः सुमित्रियेत्यनेन पूर्णाञ्जलिना तोयं गृहीत्वा दुर्मित्रियेत्यनेन यस्यां दिशि
द्वेष्योऽस्ति तस्यां दिशि द्वेषो विक्रमाद्युदकं त्वा द्वेष्यं मनसा विचिन्त्य तदञ्जलिं प्रक्षिपेत् द्वेष्य अ
भावे काष्ठादीन् स्मृत्वाञ्जलिं प्रक्षिपेत् सुमित्रिया न इति मंत्रस्य प्रजापतिर्ऋषिः आपो देव० यजु
र्ग्रहणे वि० ॐ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियेत्यस्य प्रजापतिर्ऋषिः आपो देव० यजु
रञ्जलिप्रक्षेपे वि० दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः अभिचारकेऽपि स्पृशेत् द्वि
तीयभागेन कट्यादीनामवलेपनं मृदं वामकरेणादाय नाभ्यधःकटिमवलिप्याद्भिः प्रक्षाल्य
तथैव पुनर्द्विर्लेपनप्रक्षालने कुर्यात् तथैव वस्तिं ऊरू जङ्घे चरणौ करौ च मृदा प्रत्येकं त्रिः सीत्रि
स्त्रिः प्रक्षाल्याचम्य तीर्थोदकाय नमः इति कायवाङ्मनोभिः तीर्थोदकं नमस्कुर्यात् ततस्तृती
यभागेन मृदा इदं विष्णुरिति मन्त्रेण दक्षिणपाणिगृहीतया मृदा ललाटादिनाभिपर्यन्तानि।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

गात्राणि स्पृशेन्मदि **आपोऽस्मानिति मंत्रस्य** प्रजापतिऋषिर्वरुणो देवता अनुष्टुप्छंदः मज्ज
नोन्मज्जने वि० ॐ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः ट पुनन्तु विश्वं हि रिप्रं प्रवहन्ति
देवीः तत उदिदाभ्यः इत्यादि पूतएमीत्यंतेनोन्मज्जेत् ॐ उदिदाभ्यः शुचिरापूतऽएमि पुनस्त्वा
सी त्रिमज्ज्योन्मज्ज्याचमेत् ततः पाणिभ्यां गोमयमादाय पूर्वं मृल्लेपनवल्ललाटादिपादतलप
र्यन्तमङ्गान्यनुलिम्पेत् **मानस्तोक** इति मंत्रस्य कुत्सऋषिः रुद्रो देवता जगती छंदः अ
ङ्गानुलेपने विनियोगः ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः मा नो
वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे **उदके स्नायात्** ततो गोमयलिप्तप
व वक्ष्यमाणैरष्टभिर्मन्त्रैः इति मंत्रे कुंभस्थया दक्षिणाङ्गुलकेन वा शिरोऽभिषिंचेत् दत्वा गुरुं पर्व
गृहे तिष्ठेत् हस्तद्वयेन तत् सावकाशामेकमुष्टिं कुर्यात् साकुम्भमुद्रिकेति मंत्रा यथा इमम्मे व
रुणेति मंत्रस्य शुनःशेपऋषिर्वरुणो देवता गायत्री छन्दः अभिषेके विनियोगः इमम्मे वरुण
श्रुधी हवमद्या च मृडय त्वामवस्युराचके १ तत्त्वा यामीति मन्त्रस्य शुनःशेपऋषिर्वरुणो देवता त्रिष्टुप्
छंदः अभिषेके विनियोगः **ॐ तत्त्वा यामि** ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः २ त्वन्न इति मन्त्रस्य वामदेवऋषिः अ
ग्निवरुणौ देवते त्रिष्टुप्छंदः अभि० **ॐ त्वन्नो** ऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ३ सत्वन्न इति मन्त्रस्य वामदेवऋ।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

८

षिः अग्नीवरुणौ देवते त्रिष्टुप्छन्दः अभिषे० ओं स त्वन्नो ऽग्नेऽवमो भवोती नेदिष्ठो अस्या ऽ ३
अवसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि ४ मापइति प्रजापतिरृ
षिर्हृदयशूलं देवता यजुः अभिषे० ओं मापो मौषधीर्हिंसीर्धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च
यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण मुञ्च ५ उदुत्तममितिमंत्रस्य शुनःशेप ऋषिर्व
रुणो देवता त्रिष्टुप्छंदः अभिषेके विनियोगः ओं उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं
श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम ६ मुञ्चन्त्विति मन्त्रस्याथर्वणो
भिषक् बन्धुरृषिरोषधयो देवता अनुष्टुप्छन्दः अभिषेके विनियोगः ओं मुञ्चन्तु मा शपथ्यादथो
वरुण्यादुत अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषात् ७ अवभृथेत्यस्य प्रजापतिरृषि
र्यज्ञो देवता अनुष्टुप्छंदः अभिषेके विनियोगः ओं अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः अ
व देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देवरिषस्पाहि ८ ततस्त्रिमो निमा
ज्यान्तर्ज्याचामेत् ततो वक्ष्यमाणैरोंकारादिभिर्मन्त्रैः प्रतिमन्त्रं कुशत्रयेण सजलेन नाभिदक्षिण
पार्श्वमारभ्य वामोरोपरि नीत्वा नाभिवामपार्श्वपर्यन्तं प्रदक्षिणमात्मानं पावयेत् मन्त्रा यथा
ओंकारस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीछन्दः पावने विनियोगः ओं पुनातु म
हाव्याहृतीनां प्रजापतिरृषिः अग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुप्छन्दांसि पावने वि यो गः।
ओं भूः पुनातु २ ओं भुवः पुनातु ३ ओं स्वः पुनातु ४ तत्सवितुरिति विश्वामित्र ऋषिः सवि

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

तादेवता गायत्रीछंदः पावनेविनियोगः ॐतत्स वितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनः प्रचोद
यात् ॐशुनात् ५ आपोहिष्ठेतितिसृणां सिन्धुद्वीपऋषि रापोदेवता गायत्रीछन्दः पावनेविनियो
गः ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेरणायचक्षसे ६ योवःशिवतमोरसस्तस्य
भाजयतेहनः उशतीरिवमातरः ७ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ आपोजनयथाचा
नः शुनात् ८ इदमित्यस्य प्रजापतिऋषि रापोदेवता महापंक्तिछन्दः पावनेविनियोगः ॐइद
मापः प्रवाहतावद्यञ्चमलञ्चयत् यच्चाभिदुद्रोहानृतंयच्चशेपेऽअभीरुणम् आपोमातस्मादेनसः
पवमानश्चमुञ्चतुशुनात् ९ हविष्मतीरित्यस्य प्रजापतिऋषि लिङ्गोक्तादेवता अनुष्टुप्छ
न्दः पावनेविनियोगः ॐ हविष्मतीरिमाऽआपोहविष्माँ२ आविवासति हविष्मान्देवोऽअ
ध्वरोहविष्माँ२ ऽअस्तुसूर्यः शुनात् १० देवीरापःइत्यस्य प्रजापतिऋषि रापोदेवता पंक्तिछंदः
पावनेविनियोगः ॐदेवीरापो ऽअपान्नपाद्योवऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः तन्देवे॥
भ्योदेवत्रादत्तशुक्रपेभ्योयेषांभागस्थस्वाहा शुनात् ११ कार्षिरसीत्यादीनांत्रयाणांप्रजापतिऽ
ऋषिः कार्षिरसीत्यस्याक्षरचतुष्टयस्याज्यंदेवता समुद्रस्यत्वमापइत्यस्य आपोदेवता त्रयाणाम
नुष्टुप्छंदः पावनेविनियोगः ॐकार्षिरसिसमुद्रस्यत्वा क्षित्याऽउन्नयामि समापोऽअद्भिरग्मा
नसमोषधीभिरोषधीः शुनात् १२ अपोदेवताइत्यस्य वरुणऋषि रापोदेवता त्रिष्टुप्छन्दः पावने
विनियोगः ॐ आपोदेवतामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ताभिर्मित्रावरुणावभ्य

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

त्विग्वन्त्याभिरिन्द्रमनयन्त्वरातीः पुनातु १३ द्रुपदादिवेत्यस्य प्रजापत्याश्विसरस्वत्यऋषयः आ
पोदेवता अनुष्टुप्छन्दः पावनेविनि॰ ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतंपवित्रे
णाज्यमापः शुन्धन्तु मैनसः पुनातु १४ शन्नोदेवीत्यस्य सिंधुद्वीपऋषिः गायत्रीछंदः आपोदेव
तापावनेविनियोगः ॐ शन्नो देवीरभिष्टयऽआपोभवन्तु पीतये शंयोरभिस्रवन्तु नः पुना
तु १५ अपांरसमित्यस्य बृहस्पतिऋषिः रसोदेवता अनुष्टुप्छन्दः पावनेविनियोगः
ॐ अपांरसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् अपांरसस्य योरसस्तम्वोगृह्णाम्युत्त
ममुपयामगृहीतोसीन्द्राय त्वाजुष्टं गृह्णाम्येषते योनिरिन्द्राय त्वाजुष्टतमम् पुनातु १६
आपोदेवीरित्यस्य सिन्धुद्वीपऋषिः आपोदेवता न्यंकुसारिणीबृहतीछन्दः पावनेविनियोगः
ॐ आपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः तासामास्थानादुज्जिहतामोषधयः सुपि
प्पलाः पुनातु १७ पुनन्तुमेत्यस्य प्रजापतिऋषिः पितरोदेवता अनुष्टुप्छन्दः पावनेविनियो
गः ॐ पुनन्तुमा पितरः सोम्यासः पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः पवित्रेणशता
युषा पुनातु १८ पुनन्तुमेत्यस्य प्रजापतिऋषिः पितरोदेवता अनुष्टुप्छंदः पावनेविनियो
गः ॐ पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै पुनातु
१९ अग्नइत्यस्य वैश्वानरऋषिः अग्निर्देवता अनुष्टुप्छंदः पावनेविनियोगः ॐ अग्नऽआयूꣳषि
पवसऽआसुवोर्जमिषंचनः आरेबाधस्वदुच्छुनाम् पुनातु २० पुनन्तुमेत्यस्य प्रजापतिऋ

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

षिः लिङ्गोक्तादेवता अनुष्टुप्छंदः पावनेविनियोगः ॐपुनन्तुमा देवजनाः पुनन्तुमनसाधि
यः पुनन्तुविश्वाभूतानि जातवेदः पुनीहिमा पुनातु २१ पवित्रेणपुनीहिमेत्यस्य प्रजापतिऋ।
षि रग्निर्देवता गायत्रीछंदः पावनेविनियोगः ॐपवि त्रेणपुनीहिमाशुक्रेणदेवदीद्यत् अ
ग्नेक्रत्वाक्रतूँ२ ऽरनु पुनातु य त्वंइति प्रजापतिऋषि रग्निर्देवता तृतीयपादस्य ब्रह्मादेवता
गायत्रीछंदः पावनेविनियोगः ॐय त्तेपवित्रमर्चिष्यग्नेविततमन्तरा ब्रह्मतेनपुनातुमा पुनातु
२२ पवमानइत्यस्य प्रजापतिऋषिः सोमोदेवता गायत्रीछंदः पावनेविनियोगः ॐपाव मानः
सोऽद्यजनः पवित्रेणविचर्षणिः यःपोतासपुनातुमा पुनातु २४ उभाभ्यांदेवेत्यस्य प्रजाप
तिर्ऋषिः सवितादेवता गायत्रीछंदः पावनेविनियोगः ॐउभाभ्यां देवसवितःपवित्रेण
सवेनच मांपुनीहिविश्वतः पुनातु २५ वैश्वदेवीपुनतीत्यस्य प्रजापतिर्ऋषि र्विश्वेदेवादेवता
त्रिष्टुप्छंदः पावनेविनियोगः ॐवैश्व देवीपुनतीदेव्या गाद्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठाः
तयामदन्तः सधमादेषुवयंस्यामपतयोरयीणाम् पुनातु उदकंस्पृशेत् २६ अग्निष्टो
मकर्मणिदीक्षितकर्तृकपावनवत्यावनमंत्रकृशापवित्रैश्चित्पतिर्मेति पावयतीतिसूत्रदर्श
नात् चित्पतिर्मेत्रयाणांप्रजापतिऋषिः चित्पतिर्मावाक्पतिर्मेत्युभयोः प्रजापतिर्देवत्यदेवो
माइत्यस्य सवितादेवता यजुःपावनेविनियोगः ॐचित्पति र्मापुनात्वच्छिद्रेणपवित्रेण
सूर्यस्यरश्मिभिः तस्यतेपवित्रपते पवित्रपूतस्ययत्कामः पुनेतच्छकेयम् पुनातु २७ प

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

वेनाभेरूर्द्ध्वम्प्लावयित्वा **वाक्** पतिर्मा पुनात्वच्छिद्रेणोत्पारभ्य तच्छकेयमित्यनेन नाभेर्मध्यं पा
वयेत् **ॐ वाक्** पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपू
तस्य यत्कामः पुनेतच्छकेयम् इत्यनेन मध्यं देवो मा सविता पुनात्वच्छिद्रेणोत्पारभ्य तच्छके
यमित्यनेन नाभेरधः पावयेत् ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् पुनः सप्तत्रयेन सर्वाङ्गम्प्लावयेत् ॥
ततः पूर्वोक्तप्रकारेण ॐ पुनातु १ ॐ भूः पुनातु २ ॐ भुवः पुनातु ३ ॐ स्वः पुनातु ४ ॐ तत्स
वितु० पुनातु **तत्र मन्त्रक्रमः** इमम्मे तत्त्वा० त्वन्नः० सत्वन्नः० ॥ ॐ मापो मौषधीर्हि
ंसीर्धाम्नो धाम्नो राजंस्ततो वरुणो मुञ्च यदाहुरघ्न्या० इति वरुणेति शपामहे ततो वरुणो
मुञ्च उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय अथा वयमादित्यव्रते तवाना
गसोऽअदितये स्याम मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत अथो यमस्य पड्वीशात्सर्वस्माद्देवकि
ल्विषात् ११ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः अव देवैर्देवकृतमेनोयासिषमव मर्त्यै।
र्मर्त्यकृतम्पुरुराव्णो देव रिषस्पाहि तत अपाघमित्यनेनापमार्गैस्त्रिभिर्मार्जयेत् अपाघमित्य
स्य पुनःशेपऋषिः लिङ्गोक्ता देवता अनुष्टुप्छन्दः अपामार्जने विनियोगः ॐ अपाघमप
किल्बिषमपकृत्यमपोरपः अपामार्ग त्वमस्मदप दुःष्वप्न्यं सुव पुनातु ततः काण्डात्काण्डादि
ति मन्त्रेण दूर्वास्त्रिभिस्त्रिभिर्मार्जयेत् काण्डात्काण्डादित्यस्याग्निरृषिर्दूर्वेष्टका देवता अ

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

१३ नुष्टुप्छन्दः मार्जने विनियोगः ॐ काण्डात् काण्डात्प्ररोहन्ती परुषः परुषस्परि एवा नो दूर्वे प्र
तनु सहस्रेण शतेन च ॥ ४२ ॥ ततो वक्ष्यमाण ऋक्त्रयाणामन्यतमेनान्तर्जले मग्नस्त्वनुच्छ्वसन्न
घमर्षयेत् ऋतञ्च सत्यञ्चेत्यस्याघमर्षण ऋषिः भाववृत्तं देवतं अनुष्टुप्छन्दः अघमर्षणे विनि
योगः ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रो अर्णवः स
मुद्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचन्द्रम
सौ धाता यथापूर्वमकल्पयत् दिवञ्च पृथिवीं चान्तरिक्षमथो स्वः त्रिरावर्तयेत् द्रुपदेत्यस्या
ऋष्यादीनां स्मरणं पूर्ववत् अघमर्षणे विनियोगः ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो म
लादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः इति वा त्रिः पठेत् आयं गौरित्येषां त्रयाणां प्रजा
पतिरृषिरग्निः परावररूपो देवता गायत्रीछन्दः अघमर्षणे विनियोगः ॐ आयं गौः पृश्नि
रक्रमीदसदन्मातरं पुरः पितरञ्च प्रयन्त्स्वः ३ इति वा ऋचं त्रिरावर्तयेत् सशिरसं प्राणाया
मं वा त्रिः पठेत् ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितु० स्वरो
म् ॐ इति वा त्रिः पठेत् यद्वा परमात्मानं विश्वशेषशायिनं सायुधं सपत्नीकं ध्यायेत् ततः स्ना
नाङ्गतर्पणं विष्णुः स्नातस्यार्द्रवाससो देवर्षिपितृतर्पणमम्भस्य एवब्रवीतेति पराशरोऽपि नित्यं नै
मित्तिकं काम्यं त्रिविधं स्नानमुच्यते तर्पणं तु भवेत्तस्य तदङ्गत्वेन कीर्तितं ब्राह्मणस्तिलैः कृत्वाञ्जला
प्सु तर्पयेत्पितॄन् स्थलस्थेन न कर्तव्यं पितॄणां तृप्तिमिच्छता रोमस्थैस्तिलैर्न तर्पयेदिति ह॥

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ब्रह्मयज्ञोक्ततर्पणमेव **ओं मोदस्तृप्यतु** १ प्रमोदस्तृप्यतु २ सुमुखस्तृप्यतु ३ दुर्मुख
स्तृप्यतु ४ अविघ्नस्तृप्यतु ५ विघ्नकर्तास्तृप्यतु ६ ब्रह्मादयो देवास्तृप्यन्तु ७ गौतमस्तृप्यतु
८ भरद्वाजस्तृप्यतु ९ विश्वामित्रस्तृप्यतु १० जमदग्निस्तृप्यतु ११ वसिष्ठस्तृप्यतु १२ कश्य
पस्तृप्यतु १३ अत्रिस्तृप्यतु १४ दक्षस्तृप्यतु १५ मरीचिस्तृप्यतु १६ अङ्गिरास्तृप्यतु १७ पु
लहस्तृप्यतु १८ पुलस्त्यस्तृप्यतु १९ क्रतुस्तृप्यतु २० प्रचेतास्तृप्यतु २१ भृगुस्तृप्यतु २२ म
नवस्तृप्यन्तु २३ इति गोकर्णमात्रं जलमुद्धृत्य देवतीर्थेन एकैकमञ्जलिं जले प्राङ्मुखः क्षिपे
त् येन तीर्थेनाञ्जलिग्रहणं तेनैव प्रक्षेपः सर्वत्र अथोदङ्मुखो नवामूर्द्धजघः तिरश्चो दक्षि
णाग्रान् कुशान् कृत्वोदगग्रान्वा प्राजापत्येन तीर्थेन सनकादींस्तर्पयेत् **सनकादयो म
नुष्यास्तृप्यन्तु** द्वावञ्जली ततोऽपसव्यं तानेव कुशान्मूलाग्राभ्यां द्विगुणीकृत्य दक्षिणामु
खः पितृतीर्थेन कव्यवाडनलादींस्तर्पयेत् **कव्यवाडनला** दयो देवपितरस्तृप्यन्तु त्रयोऽञ्जला
यः **अस्मत्पितृ** पितामहास्तृप्यन्तु मातामह प्रमातामह वृद्धप्रमातामहास्तृप्यन्तु आब्र
ह्मस्तम्बपर्यन्तं जगत्तृप्यतु अत्र पराशरः शुक्लैस्तु तर्पयेद्देवान्मनुष्याञ्शबलैस्तिलैः पितॄन् स
न्तर्पयेत् कृष्णैः तर्पणे सर्वदा द्विज इति आश्वलायनः स्नानाङ्गतर्पणं कृत्वा यक्ष्माणो जलमाहरे
त् यन्मया दूषितं तोयं मलैः शारीरसम्भवैः तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते तिलोदकं ततस्ती
रमागत्य अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिं

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

१५

इति जलाञ्जलिं तटे निक्षिपेदिति **स्नानाङ्गतर्पणं** एवमुक्तविधिना स्नानाङ्गतर्पणं कृत्वा जलात्
बहिर्निष्क्रम्य वक्ष्यमाणलक्षणे वाससी परिधाय वक्ष्यमाणलक्षणासने प्राङ्मुखो वोदङ्मुखो वा
उपविशेत् ततो गङ्गादितीर्थमृत्तिकया गार्हपत्याग्निभस्मना वा गोपीचन्दनेन वा यथाधि
कारी भाले त्रिपुण्ड्रं मूर्द्धपुण्ड्रं वा तिलकं कुर्यात् **पुण्ड्रधारणं** ऊर्ध्वपुण्ड्रं द्विजः कुर्यात्क्ष
त्रियस्तु त्रिपुण्ड्रकं अर्द्धचन्द्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु १ दग्धजीर्णं च मलिनं मूषकापहृतं तथा
खादितं गोमहिष्याद्यैस्तत्त्याज्यं सर्वथा द्विजैः २ परिधानवस्त्रलक्षणं अरजकधौताक्षालिते सदशे शु
क्ले अनग्निदग्धे अच्छिद्रे अस्यूते गैरिकादिरागेनाविकृते शुक्ले कार्पासनिर्मिते परिधानीयोत्तरीये
धारयेत् ततो द्विराचामेत् जीवत्पितृकेणोत्तरीयं न धार्यं उत्तरीयं योगपट्टं न तर्जन्यां रजतं तथा न जी
वत्पितृके धार्यं ज्येष्ठो वा विद्यते यदीति वचनात् ततः कटेरधस्ताद्दक्षहस्तेन मृदा त्रिर्लिप्य प्रक्षाल्या
ऽन्तरं मणिबन्धादङ्गुल्यपर्यन्तौ पाणी मृदा त्रिर्लिप्य प्रक्षालयेत् आसनलक्षणं श्रीपर्ण्यादिप्रशस्तदारु
निर्मितं कुशाद्याच्छन्नं निधापयेत् ततः कुशपवित्रोपग्रहपाणिः पादौ जले स्थले कृत्वा पूर्ववद्द्विराच
म्य भगवन्तं परमात्मरूपं नारायणं स्मृत्वा मध्याह्नसन्ध्योपासनमारभेत् तत्रैव क्रमः अथ मध्या
ह्नसन्ध्या तत्र विशेषः उपात्तदुरितक्षयद्वारा रुद्रप्राप्त्यै मध्याह्नसन्ध्योपासनमहं करिष्ये आगच्छ
वरदे देवी त्र्यक्षरे रुद्रवादिनि सावित्रि छन्दसां मातः रुद्रयोने नमोऽस्तु ते १ पूर्वं मध्याह्नसन्ध्यास्व
रूपं विभावयेत् तदित्थं मध्याह्नसन्ध्यां श्वेतपद्मां श्वेतासनस्थां श्वेताम्बरां श्वेतवर्णां श्वेतमाल्यानुलेपां

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ना पञ्चवक्त्री दशभुजा त्रिनेत्रा त्रिशूलाक्षमाला कमण्डलुकपालधारिणी सर्वाभरणभूषिता सा
वित्रीस्तवती वृषभवाहिनी यजुर्वेदसंहिता रुद्रदैवत्या त्रिपदा षट्कुक्षिः पञ्चशीर्षाग्निमुखा रुद्र
शिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनसगोत्रा शुक्लवर्णा कर्मसु ज्ञाने विनियोगः ततः प्राणाया
मं कुर्यात् स यथा ओंकारस्य ब्रह्मा ऋषिः गायत्रीछन्दः परमात्मा देवता प्राणायामे विनियोगः
ओं सप्तव्याहृतीनां प्रजापति विश्वामित्र जमदग्नि भरद्वाज गोतमात्रि वसिष्ठ कश्यपा ऋषयः
अग्निवायुसूर्य बृहस्पति वरुणेन्द्र विश्वेदेवा देवताः गायत्र्युष्णिगनुष्टुप् बृहतीपंक्ति त्रिष्टुप् ज
गत्यश्छन्दांसि प्राणायामे विनियोगः तत्सवितुरिति विश्वामित्रऋषिः सविता देवता गायत्री
छन्दः प्राणायामे विनियोगः आपोज्योतिरिति प्रजापतिर्ऋषिः ब्रह्माग्निवायुसूर्यो देवताः द्वि
पदा गायत्रीछन्दः प्राणायामे विनियोगः एवं ऋष्यादिकं स्मृत्वा बद्धासनी मौनी संमिलितन
यनो दक्षिणपाण्यङ्गुष्ठेन दक्षिणनासिकां पीडयन् तथा कनिष्ठिकानामिकाभ्यां उत्तरनासिकां।
पीडयन् मध्यमातर्जन्यौ मुञ्चन् सव्याहृतिकां सप्रणवां सशिरस्कां गायत्रीं पूरककुम्भकरे
चकक्रमेण त्रिः पठेत् ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्सवितु०
रोम् इति मन्त्रान्तव्याहृत्य मनसा पठेत् ततश्चापः पुनन्त्वित्याचमनं कुर्यात् आपः पुनन्त्वि
ति मन्त्रस्य कश्यपऋषिः आपो देवता अनुष्टुप्छन्दः आचमने विनियोगः ओं आपः पुनन्तु पृ।
थिवीं पृथ्वी पूता पुनातु मां पुनातु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

दुश्चरितं मम सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं स्वाहेति मन्त्रेण सकृदयमाचम्य स्मार्ताचमनं कृत्वाचामान् कुशान्दक्षिणपाणौ धृत्वा आपोहिष्ठेत्यादितृचेन नवभिः पादैः प्रतिपादं शिरोहृदयपादयुगलानि मार्जयेत् आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिः आपो देवता गायत्री छन्दः मार्जने विनियोगः ॐ आपोहिष्ठा मयोभुवः शिरसि १ ॐ ता न ऊर्जे दधातन पादयोः ॐ महे रणाय चक्षसे हृदये ३ ॐ यो वः शिवतमो रसः हृदये ४ ॐ तस्य भाजयतेह नः पादयोः ५ ॐ उशतीरिव मातरः शिरसि ६ ॐ तस्मा अरं गमाम वः शिरसि ७ ॐ यस्य क्षयाय जिन्वथ हृदये ८ ॐ आपो जनयथा च नः पादयोः ९ **तथा च स्मृतिः** आपोहिष्ठेत्यृचैः कुर्यान्मार्जनं तु कुशोदकैः प्रणवेन तु संयुक्तं क्षिपेद्वारि पदे पदे इति ततश्चुलकेन जलमादाय तस्मिन्नासिकाग्रं निधाय द्रुपदादिवेति ऋचं पठित्वा तज्जलं भूमावुत्सृज्य षट्खाणि पञ्चाणि चाष्टमिश्राणाञ्जलिनादायोत्थाय प्रणवव्याहृतिपूर्विकया गायत्र्येकाञ्जलिं सूर्याभिमुखस्त्रिः क्षिपेत् तत ऊर्ध्वबाहुः सूर्यमुदीक्षमाणो वक्ष्यमाणैर्मन्त्रैः सूर्योपस्थानं कुर्यात् तत्र मन्त्रा यथा उद्वयमिति प्रस्कण्व ऋषिः सूर्यो देवता अनुष्टुप्छन्दः सूर्योपस्थाने विनियोगः ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् १ उदुत्यमिति प्रस्कण्व ऋषिः सूर्यो देवता गायत्री छन्दः सूर्योपस्थाने विनियोगः ॐ उदु त्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यम् २ चित्रं देवानामिति कुत्स आङ्गिरस ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

सूर्योपस्थाने विनियोगः ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथि वी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ३ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः सूर्यो देवता ब्रा ह्मी त्रिष्टुप् छन्दः सूर्योपस्थाने विनियोगः तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ४ **अथ ध्यानं** ॐ नकुलार्कमण्डलमध्यस्थां प्रभवतीं सर्वशुक्लां पञ्चवक्त्रां मणिनेत्रां मिडकलां विभूषणां त्रिशूलखड्गखट्वाङ्गडमरुकुशाचतुर्भुजां वृषभासनस्थां रुद्रदेवत्यां यजुर्वेदमुदाहरन्तीं भूर्लोकाधिष्ठात्रीं सावित्रीं नाम देवतां ध्यात्वा यथाशक्ति जपेत् तेजोसीति परमेष्ठी प्रजापतिर्यजुर्राज्यं देवता गायत्र्यावाहने विनियोगः ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि १ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्री छन्दः व्याहृतीनां प्रजापतिरृषिरग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुप् छन्दांसि तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः गायत्रीजपे विनियोगः ॐ भूर्भुवः स्वः तत्सवितु० ५ इति दशावरं शतमध्यं सहस्रपरमां वा जपेत् **ततो विभ्राडित्यनुवाकपुरुषसूक्त** शिवसंकल्पमण्डलब्राह्मणैः सूर्यमुपतिष्ठेत् तत्र विभ्राडित्यस्य विभ्राट् सौर्य ऋषिः सूर्यो देवता त्रिष्टुप् छन्दः उदुत्यमिति तिसृणां प्रस्कण्व ऋषिः सूर्यो देवता गायत्री छन्दः तं प्रत्नथेत्यस्य काश्यपो वत्सार ऋषिः सोमो दे

CC-0 Residence of Asif Sahib Pulwama. Digitized by eGangotri

वता त्रिष्टुप्छन्दः अयंवेनइत्यस्य वेनऋषिः सोमोदेवता त्रिष्टुप्छंदः चित्रमित्यस्य कु
त्साङ्गिरसऋषिः सूर्योदेवता त्रिष्टुप्छन्दः आनइत्यस्य अगस्त्यऋषिः सूर्योदेवतात्रि
ष्टुप्छन्दः यदद्येत्यस्यश्रुतकक्षसुकक्षावृषी सूर्योदेवता गायत्री तरणिरित्यस्य प्र
स्कण्वऋषिः सूर्योदेवता गायत्रीछन्दः तत्सूर्यस्येति द्वयोः कुत्सऋषिः सूर्योदेवता
त्रिष्टुप्छन्दः द्वितीयस्य सतोबृहतीछन्दः आयन्त इवेत्यस्य नृमेधाऋषिः सूर्योदे
वता बृहतीछन्दः आयादेवाइत्यस्य कुत्सऋषिः सूर्योदेवता त्रिष्टुप्छन्दः आकृष्णेने
त्यस्य हिरण्यस्तूपआङ्गिरसऋषी सूर्योदेवता त्रिष्टुप्छन्दः सूर्योपस्थाने विनियोगः ॥
ॐ विभ्राड्बृहत् विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्दधद्यज्ञपतावविह्रुतं वातजूतोयो
ऽभिरक्षतित्मनाप्रजाः पुपोषपुरुधाविराजति १ उदुत्यम् उदुत्यञ्जातवेदसंदेवम्वह
न्तिकेतवः दृशेविश्वायसूर्यम् २ येनापावकचक्षसाभुरण्यन्तञ्जनाँ अनु त्वंवरु
णपश्यसि ३ दैव्यावध्वर्यूदैव्यावध्वर्यूऽआगतं रथेनसूर्यत्वचा मध्वायज्ञंसमञ्जाथे
तम्प्रत्नथायंवेनश्चित्रन्देवानाम् ४ तम्प्रत्नथा तम्प्रत्नथापूर्वथाविश्वथेमथाज्येष्ठता
तिम्बर्हिषदंस्वर्विदम् प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ५ अ
यम्वेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने इममपांसङ्गमेसूर्यस्यशिशु
न्नविप्रामतिभीरिहन्ति ६ चित्रन्देवानाम् चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्यवा

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

काणस्याग्नेः अप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्तस्थुषश्च ७ आनः आनऽइ
उभिर्विदथेसुशास्तिर्विश्वानरः सविता देवऽएतु अपित्याद्धुवानोमत्सथानोविश्वञ्जगदभि
पित्वेमनीषा ८ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य सर्वन्तदिन्द्रतेवशे ९ तरणिर्विश्वद
र्शतः तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य विश्वमाभासिरोचनम् १० तत्सूर्य्यस्यदेवत्व
न्तन्महित्वम्मध्याकर्त्तोर्विततꣳसञ्जभार यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसि
मस्मै ११ तन्मित्रस्य तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे अनन्तमन्यद्रु
शदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ती १२ बण्महाꣳ बण्महाꣳऽअसिसूर्य्यबडादित्यम ।
हाꣳ२ असि महस्तेसतोमहिमापनः स्मतेज्ञादेवामहाꣳ२ असि १३ बट्सूर्यश्रवसामहाꣳ२
असिसत्रादेवमहाꣳ२ असिमह्नादेवानामसुर्य्यः पुरोहितोविभुज्योतिरदाभ्यम् १४ आय
न्तऽइवसूर्य्यम् आयन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत वसूनिजातेजनमानऽओजसाप्रति
भागन्नदीधिम १५ अद्यादेवाः अद्यादेवाऽउदितासूर्यस्यनिरꣳहसःपिपृता निरवद्यात् त
न्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः १६ आकृष्णेनरजसाव
र्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्
१७ **अथपुरुषसूक्तं** सहस्रशीर्षेतिषोडशानां नारायणपुरुषऋषिः पञ्चदशा ।
नामनुष्टुप्छन्दः षोडशस्यास्त्रिष्टुप्छन्दः पुरुषोदेवता सूर्य्योपस्थानेविनियोगः ओंसह

CC-0 Residence of Asif Sahib Pulwama. Digitized by eGangotri

स्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् सभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् १ पुरुषएवेद
ँसर्वंयद्भूतंयच्चभाव्यम् उतामृतत्वस्येशानोयदन्नेनातिरोहति २ एतावानस्य एतावानस्य
महिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ३ त्रिपादूर्ध्वः त्रिपादूर्ध्वउ
दैत्पुरुषःपादोस्येहाभवत्पुनः ततोविश्वंव्यक्रामत्साशनानशनेअभि ४ ततोविराड ता
तोविराडजायतविराजोअधिपूरुषः सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ५ तस्माद्य
ज्ञात् तस्माद्यज्ञात्सर्वहुतःसम्भृतंपृषदाज्यम् पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये ६
तस्माद्यज्ञात् तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे छन्दांसिजज्ञिरेतस्माद्यजुस्तस्मा
दजायत ७ तस्मादश्वाः तस्मादश्वाअजायन्तयेकेचोभयादतः गावोहजज्ञिरेतस्मात्तस्मा
ज्जाताअजावयः ८ तंयज्ञम् तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाअयजन्त
साध्याऋषयश्चये ९ यत्पुरुषं यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् मुखंकिमस्यासीत्।
किम्बाहूकिमूरूपादाउच्यते १० ब्राह्मणोस्य ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ऊरू
तदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ११ चन्द्रमामनसः चन्द्रमामनसोजातश्चक्षोःसूर्योऽ
अजायत श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत १२ नाभ्याआसीत् नाभ्याआसीदन्तरि
क्षंशीर्ष्णोद्यौःसमवर्तत पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ अकल्पयन् १३ यत्पुरुषे
ण यत्पुरुषेणहविषादेवायज्ञमतन्वत वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मश्शरद्धविः १४ स

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

त्राऽस्य सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् १५
यज्ञेन यज्ञम् यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ते ह नाकं महिमानः
सचन्त यत्र पूर्वे साध्याः सन्ति देवाः १६ **अथ शिवसंकल्पाः** यज्जाग्रत इति षडृचस्य शि
वसंकल्पऋषिर्मनोदेवता त्रिष्टु० सूर्योपस्थाने विनियोगः **यज्जाग्रतः** यज्जाग्रतो दूर
मुदैति दैवं तदु सुप्तस्य तथैवैति दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु १
येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः यदपूर्वं यक्षमन्तः प्रजानां त
न्मे मनः शिवसंकल्पमस्तु २ यत्प्रज्ञानम् यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्र
जासु यस्मान्न ऋते किञ्चन कर्म्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ३ येनेदम् येनेद
म्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्वम् येन यज्ञस्तायते सप्त होता तन्मे मनः शि
वसंकल्पमस्तु ४ यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः यस्मि
श्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ५ सुषारथिरश्वानिव यन्मनुष्यान्नेनी
यतेऽभीशुभिर्वाजिन इव हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ६ **अ
थ मण्डलब्राह्मणम्** मण्डलब्राह्मणस्य विवस्वान् ऋषि वायुर्दे० सूर्योप० **यदे।**
तन्मण्डलं तपति तन्महदुक्थं ता ऋचः स ऋचां लोकोऽथ यदेतदर्चिर्दीप्यते तन् महाव्र
तं तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽन्तः पुरुषः सोऽग्निस्तानि यजूꣳषि

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

सयजुषांलोकः १ सैषात्रय्येवविद्यातपति तद्धैतदप्यविद्वांसआहुस्त्रयीवाएषाविद्यात
पतीतिवाग्घैवतत्पश्यन्तीवदति २ सएषएवमृत्युःयएषएतस्मिन्मण्डले
पुरुषोऽथैतदमृतंयदेतदर्चिर्दीप्यतेतस्मान्मृत्युर्नम्रियतेऽमृतेह्यन्तस्तस्मादुनदृश्यतेऽमृतेह्य
न्तः तदेषश्लोकोभवति तदेषश्लोकोभवत्यन्तरंमृत्योरमृतमित्यवरंह्येतन्मृ
त्योरमृतंमृत्यावमृतमाहितमित्येतस्मिन्हिपुरुषएतन्मण्डलंप्रतिष्ठितंतपतिमृ
त्युर्विवस्वन्तंवस्तेइत्यसौवाआदित्योविवस्वानेषह्यहोरात्रेविवस्तेतमेषवस्ते सर्व
तोह्येतेनपरिवृतोमृत्योरात्माविवस्वतीत्येतस्मिन् हिमण्डलएतस्यपुरुषस्यात्मेतदे
षश्लोकोभवति ४ तयोर्वाएतयोरुभयोरेतस्यचार्चिषएतस्यच पुरुषस्यैतन्मण्डलं
प्रतिष्ठातस्मान्महदुक्थंपरस्मैनशंसेत् नेच्छेदेतांप्रतिष्ठांछिनदाइत्येतांह्यस्यप्रतिष्ठां
छिनत्तियोमहदुक्थंपरस्मैशंसतितस्मादुक्थशंसंभूयिष्ठंपरिचक्षतेप्रतिष्ठाच्छिन्नोहि
भवतीत्यधिदेवतम् ५ अथाधियज्ञं यदेतन्मण्डलंतपत्ययंसरुक्मोऽथयदेतदर्चि
दीप्यतइदंतत्पुष्करपर्णमापोह्येताआपःपुष्करपर्णमथ यएषएतस्मिन्मण्डलेपुरु
षोऽयमेवसयोऽयंहिरण्मयःपुरुषस्तदेतदेवैतत्त्रयं संस्कृत्योद्यच्छन्त्येतस्यैवाउ
मंशस्यामृतंश्रुतत्क्रामतितदेनमथेतियद्यवतपतितस्मादग्निताद्वियेतपरिदृत्यमस्रा
त्रयेवतदाभवतीत्यधिवाधियज्ञं ६ अथाध्यात्मं यदेतन्मण्डलंतपतियश्चैषरुक्मःइ

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

दं तच्छुक्लं मण्डलं नाथ यदेतदर्चिर्दीप्यते यच्चैतत्पुष्करपर्णमिदं तत्कृष्णं मण्डलं नाथ य एष एतस्मि
न्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ७ स एष एवा
लोकंपृणा तामेष सर्वोऽग्निरभिसम्पद्यते तस्यैतन्मिथुनं योऽयं सव्येऽक्षन्पुरुषोऽर्द्धमु हैत
दात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यदेतौ द्वौ भवतो द्वन्द्वं
हि मिथुनं प्रजननं तस्माद्द्वे लोकंपृणे उपधीयेते तस्मादु हैताभ्यां द्वाभ्यां चितिं प्रणयन्ति ८
सऽएषऽएवेन्द्रः स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन् पुरुषोऽथेयमिन्द्राणी ताभ्यां देवा एतां विधृ
तिमकुर्वन्नासिकां तस्माज्जायाया अन्ते नाश्नीयाद्वीर्यवन्तमु ह सा जनयति यस्या अन्ते नाश्नाति।
९ **तदेतद्देवव्रतम्** तदेतद्देवव्रतꣳ राजन्यबन्धवो मनुष्याणां मन्तमां गोपायन्ति
तस्मादु तेषु वीर्यवाञ्जायतेऽत्तवा ह्याद्वयस्माꣳ सा हि प्रथमेनं जनयति १० **तौ हृदय**
स्याकाशं प्रत्यवेति तौ हृदयस्याकाशं प्रत्यवेत्य मिथुनी भवतस्तौ यदा मिथुनस्यान्तं गत्वा स
स्विद इव भवत्येवꣳ हैवैतदसंविद इव भवति दैवꣳ ह्येतन्मिथुनं परमो ह्येष आनन्दः ११
तस्मादेवंवित्स्वप्यात्तस्मादेवंवित्स्वप्याल्लोक्यꣳ हैते एव तद्देवते मिथुनेन प्रियेण धाम्ना
समर्द्धयति तस्मादु ह स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनी भवन्त्यौ हिनसानीति तस्मा
दु हैतत्सुषुप्तुषः श्लेष्मणमिव मुखं भवत्येते एव तद्देवते रेतः सिञ्चतस्तस्माद्रेतस इद
ꣳ सर्वꣳ सम्भवति यदिदं किञ्च १२ **स एष एव मृत्युः** सऽएष एव मृत्युर्य एष एतस्मि

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

न्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तस्य हैतस्य हृदये पादावतिहितौ तौ ह तदाच्छि
द्योत्क्रमति स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते तस्मादु हैतं मृतमाहुराच्छेद्यस्येति ॥१३॥ ए
ष उ एव प्राणः एष हीमाः सर्वाः प्रजाः प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्रा
णाः स्वा अपियन्ति तस्मात्स्वाप्ययः स्वाप्ययो ह वै तꣳ स्वप्न इत्याचक्षते परोक्षं परोक्षकामा हि दे
वाः ॥१४॥ **स एतैः सम्पन्नः** स एतैः सम्पन्नो न कस्य चन वेद न मनसा सङ्कल्पयति न वाचान्नस्य रसं
विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतꣳ ह्येते तदापीता
भवन्ति स एष एकः सन्प्रजासु बहुधा व्याविष्टस्तस्मादेका सती लोके पृणा सर्वमग्निमभिविभ
वत्यथ यदेक एव तस्मादेका ॥१५॥ **तदाहुः** तदेकं हैको मृत्युर्बह्वा ३ इत्येकश्च बहवश्चेति
ह ब्रूयाद्यदहासावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः ॥१६॥ **तदाहुः**
तदाहुरन्तिके मृत्युर्दूरा ३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहायमिहाध्यात्मं तेनान्तिकेऽथ यद
सावमुत्र तेनो दूरे **तदेष श्लोको भवति** तदेष श्लोको भवत्यन्ते मृत्याश्रितो रसानांꣳ श्रे
तरेऽमृत इति यदेतन्मण्डलं तपति तदन्नमथ य एष एतस्मिन्मण्डले पुरुषः सोऽत्ता स एतस्मि
न्नन्ने पाश्रितो भातीत्यधिदेवतं ॥१८॥ **अथाध्यात्मं** अथाध्यात्ममिदमेव शरीरमन्नमथ योऽयं
दक्षिणेऽक्षन्पुरुषः सोऽत्ता स एतस्मिन्नन्ने पाश्रितो भाति ॥१९॥ तमेतमग्निरित्यध्वर्यव उपासते य
जुरित्येष हीदꣳ सर्वं युनक्ति सामेति छन्दोगा एतस्मिन्हीदꣳ सर्वꣳ समानं त्वक्थमिति ब

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

न्ह चाप्यद्रीदं सर्वमत्याप्नोति यावदिति यावदिदं पतेन द्रीदं सर्वं यतो विद्यामिति सर्वोऽस्य
इति सर्वविदऽमीति देवाराधिराति मन्त्रद्यामायेत्यस्य गाः स्वधेति पितरो देवजन इति देवजनवि।
दो रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्तं यथा यथोपासते तदेव भवति तद्धैनान्भूत्वावति तस्मा
स्मादेनमेवंवित्सर्वैरेवैतैरुपासीत सर्वं हैतद्भवति सर्वं हैनमेतद्भूत्वावति २० **स एष प्र**।
वीष्टकोऽग्निः स एष प्रवीष्टकोऽग्निर्ऋग्भिरेका यजुर्भिरेका सामभिरेका तद्यां कां चात्र चोपदधाति स॥
कमेव तस्यायतनमथ यां यजुर्ब्राह्मणावतस्यायतनमथ यां साम्नास्त्रक्ष्करपर्ण
मेव तस्यायतनमेवंवीष्टकः २१ **तेवा एते** तेवा एते उभे एष च स्तक्मणस्तत्रश्करपर्ण
मेतं तस्य सर्पीत उभे ऋक्सामे यजुरपीतएव मेवेष्टकः २२ **स एष एव मृत्युः** स एष
एवमृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः स एष एवं विदात्मा भव
ति स यदेवास्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवति मृत्युर्ह्यस्या
त्मा भवति २३ **समाश्रमण्डलब्राह्मणम्** एवं कायवाङ्मनोभिर्नमस्कृत्यासनोपवेशन।
विशेत **ब्रह्मयज्ञः** तस्य च कालः छन्दोगपरिशिष्टेऽभिहितः स चार्वाक् तर्पणात्का
र्यः पश्चाद्वा प्रातराहुतेः वैश्वदेवावसाने वानान्यत्रेति निमित्तकात् **ततः ब्रह्मयज्ञात्पू**
र्वं स्वशरीरे सर्वाङ्गकमस्पृष्टेत्वाकन्यासान्कुर्यात् तेयथा मुखे ॐ ऋषिभ्योविलाय
च मस्तायोर्धवन्भायनमः चक्षुषोः ॐ गौतमभरद्वाजाभ्यां नमः कर्णयोः ॐ विश्वामित्रजमद

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ग्निभ्यां॰ नासापुटयोः ॐ वसिष्ठकश्यपाभ्यां॰ वाचि ॐ अत्रये नमः शिरसि ॐ गायत्र्यै नमोऽग्न
ये॰ ग्रीवायां ॐ उष्णिहे॰ सवित्रे पृष्ठवंशे ॐ बृहत्यै॰ बृहस्पतये॰ बाह्वोः ॐ बृहद्रथन्तराभ्यां॰
द्यावापृथिवीभ्यां उदरे ॐ त्रिष्टुभे॰ इन्द्राय॰ कट्योः ॐ जगत्यै॰ आदित्याय युगपत् स्पर्शां
समवस्थलेमन्त्राहुतिः शिश्ने ॐ अतिच्छन्दसे॰ प्रजापतये अपाने यत्ता यत्तियाय॰ वैश्वानराय॰ सक्
थ्योः ॐ अनुष्टुभे॰ विश्वेभ्यो॰ जान्वोः ॐ पंक्त्यै मरुद्भ्यो पादयोः ॐ द्विपदायै॰ विष्णवे प्राणायतना
नेषु ॐ विच्छन्दसे वायवे हस्तद्वयविपर्यासेन मस्तकादिपादान्तं सर्वाङ्गेषु ॐ न्यूनाक्षरायच्छ
न्दसे नमः अङ्गेभ्यो नमः एवं सर्वाङ्गन्यासविधिं कृत्वा **यथाशक्ति ब्रह्मयज्ञमारभेत्**
स यथा श्रीपरमेश्वरप्रीत्यर्थं **ब्रह्मयज्ञेनाहं यक्ष्ये** आसनोपरिन्यस्तेषु प्राग्ग्रेषु दर्भेषु स्व
स्तिकासनेन प्राङ्मुखोपविष्टः पाण्योर्मध्ये सपवित्रदर्भमादाय दक्षिणोरौ समञ्जलीकृतमञ्ज
लिंनिधाय प्रणवव्याहृतिपूर्विकां गायत्रीं जपित्वा ऋच्यायत्र सन्याय इषेत्वेत्यादि यथाशक्ति
ब्रह्मयज्ञं कुर्यात् इषेत्वेत्याध्यायान्ते अनुवाकान्ते वा पठेत् अन्ते ॐ स्वस्तीति वदेत् ततउप
गृह्यातिरिक्तदर्भान् उदीच्यां दिशि प्रक्षिपेत् ततआचामेत् एवं प्रत्यहं ब्रह्मयज्ञकरणे द्वितीय
दिने कृष्णोस्याखरेष्ठ इत्यादि यथाशक्ति ब्रह्मयज्ञं कुर्यात् **अथवा** सम्पूर्णब्रह्मयज्ञकर
णाशक्तौ मंत्राद्यकाण्डिकां पठित्वान्तिमां काण्डिकां पठेत् ततः ब्राह्मणाद्यां पठित्वान्तिमां प
ठेत्समाचारात् एवमनुपर्युपर्यध्ययनेन अर्धदक ग्रन्थान् समापयेत् स्वरवर्णलयोपेतं मात्रा ॥

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

स्यानक्रियावित् वेदमेवं पठेयस्तु स्वाध्यायफलमश्नुते शौनकः ओंकारं व्याहृतीस्तिस्रो गायत्रीं त्रि
पदां तथा मनसैव मन्त्रस्त्वन्यवेदादिकमुपक्रमेदिति गुरोःसकाशादपूर्वाध्ययनवद्ब्रह्मयज्ञा
ध्ययनेऽनध्यायदिवसेषु परित्यागश्चाश्नी मनुराह वेदोपाकरणे चैव स्वाध्याये चैव नैत्यके नानुरो
धोऽस्त्यनध्याये होममन्त्रेषु चैव हि नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतमिति तथा च स्मृतिः
तस्य वा एतस्य यज्ञस्य यद्वावनध्यायौ यदात्मा शुचिर्यद्देशाइति अत्र विशेषो गौतमेनोक्तः अ
थ यदि वातो वायात्स्तनयेद्वा विद्युत्येद्वाऽवस्फूर्जेद्वा एकाम्ऋचमेकं वा यजुरेकं वा साम
भिव्याहरेत् ओं भूर्भुवः स्वः सत्यं तपः श्रद्धायाञ्जुहोमीति अत्र वातो वा यादित्यनध्यायोपलक्ष
णं अतोऽनध्यायेऽप्येकामृचं पठेन्नाधिकमिति गम्यते एवं ब्रह्मयज्ञं विधाय तर्पणं कुर्यात् त
र्पणप्रयोगो यथा अथ सङ्कल्पः देशकालौ संकीर्त्य देवर्षिपितृतर्पणं करिष्ये ततस्त्रीन्दर्भान्
प्रागग्रान्दक्षिणपाणौ गृहीत्वा देवानावाहयेत् विश्वेदेवासइति गृत्समद ऋषिर्विश्वेदेवा देव
ता गायत्रीछन्दः आवाहने विनियोगः ओं विश्वे देवास आगत शृणुता म इमं हवम् एदं बर्हि
र्निषीदत विश्वे देवाः शृणुतेमं इति सुहोत्र ऋषिर्विश्वेदेवा देवता त्रिष्टुप्छन्दः जपे वि॰ विश्वेदे
वाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मि
न्बर्हिषि मादयध्वम् ततः सव्यकरान्वारब्धसकुशदक्षिणकरेण तोयं गृहीत्वा स्वनाम्ना देवती
र्थेन ओंकारपूर्वं ब्रह्मादिदेवांस्तर्पयेत् पद्मपुराणे देवान्ब्रह्मऋषीन्सर्वांस्तर्पयेदक्षतोदकैः।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

तर्पयेच्च पितॄन् भक्त्या सतिलोदकचन्दनैरिति योगियाज्ञवल्क्यः यद्युद्धृतं प्रसिञ्चेत्तु तिलान्सं
मिश्रयेज्जले अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः तत्रैवं प्रकारः ओं ब्रह्मा तृप्यतामित्यभि
धाय जलमध्ये करस्थापः प्रक्षिप्येवं विष्णुस्तृ० ओं रुद्रस्तृ० यथास्वधाः ओं प्रजापतिस्तृ० ओं दे
वास्तृप्य० ओं छन्दांसि तृ० ओं वेदास्तृ० ओं ऋषयस्तृ० ओं पुराणाचार्यास्तृ० ओं गन्धर्वास्तृ० ओं
इतराचार्यास्तृ० ओं संवत्सरः सावयवस्तृप्य० ओं देव्यस्तृप्यन्तां ओं अप्सरसस्तृप्य० ओं देवानु
गास्तृ० ओं नागास्तृ० ओं सागरास्तृ० ओं पर्वतास्तृ० ओं सरितस्तृ० ओं मनुष्यास्तृ० ओं यक्षास्तृ० ओं
रक्षांसि तृ० यथास्वधाः ओं पिशाचास्तृ० ओं सुपर्णास्तृ० ओं भूतानि तृ० ओं पशवस्तृ० ओं वनस्पत
यस्तृ० ओं ओषधयस्तृ० ओं भूतग्रामश्चतुर्विधस्तृप्यतां इति प्रत्येकमेकैकेन चुलकेन तर्पयि
त्वोत्तराभिमुखो निवीती जलैस्तिरश्चः कुशान् कृत्वाञ्जलिनापो गृहीत्वा ओं सनकस्तृप्यतामि
त्यभिधाय प्राजापत्यतीर्थेन द्वौ द्वावञ्जली जलं दत्वा ओं सनन्दनस्तृ० ओं सनातनस्तृ० ओं कपि
लस्तृ० ओं आसुरिस्तृ० ओं वोढुस्तृप्यतां ओं पञ्चशिखस्तृ० एवं द्वौ द्वावञ्जली एकैकस्मै दत्वा दक्षि
णामुखः प्राचीनावीती सव्यं जान्वाच्याङ्गुष्ठेन तिलानादाय दक्षिणपाणौ गृहीत्वा तानेव कु
शान्द्विगुणमूलान् कृत्वोशन्तस्त्वेत्यनया कव्यवाडनलादीनावाह्यायन्त्वन इति जपित्वा क
व्यवाडनलादींस्तर्पयेत् तद्यथा उशन्तस्त्वेति प्रजापतिर्ऋषिः पितरो देवता अनुष्टुप्छन्दः।
आवाहने वि० ओं उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि उशन्नुशत आवह पितॄन्हविषेऽ।

अन्तेवे आयन्तुन इत्यस्य शङ्खऋषिः पितरोदेवता त्रिष्टुप्छन्दः जपेवि० ओंआयन्तुनः पितरः।
सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान् ततोद्वि
रञ्जलिंप्रपूर्य पितृतीर्थेनाञ्जलिंक्षिपेत् ओंकव्यवाडनलस्तृ· ओंसोमस्तृ· ओंयमस्तृ· ओंअग्नि
ष्वात्ताः पितरस्तृप्यन्तां ओंसोमपाः पितरस्तृ· बर्हिषदः पितरस्तृ· ओंयमायनमः ओंधर्मराजा
य· ओंमृत्यवे· ओंअन्तकायनमः ओंवैवस्वताय· ओंकालायनमः ॥ ओंसर्वभूतक्षयाय· ओंऔ
दुम्बराय· ओंदध्नाय· ओंनीलाय· ओंपरमेष्ठिने· ओंवृकोदरायनमः ओंचित्रायनमः ओंचित्रगुप्तायन
मः गोत्रनामपूर्वकंसव्यं जान्वाच्य पितृतीर्थेन दक्षिणाभिमुखेन द्विगुणदर्भेण तिलमिश्रितेनजा
लेनपित्रादिभ्यस्त्रीस्त्रीनञ्जलीन्दद्यात् अञ्जलिनियममाहव्यासः एकैकमञ्जलिंदेवा द्वौद्वौतुस
नकादयः अर्हन्ति पितरस्त्रीं स्त्रीं स्त्रियस्त्वेकैकमञ्जलमिति अमुकगोत्रास्मत्पिता अमुकशर्मातृ
प्यतामिदंजलंतस्मैस्वधा इत्येकाञ्जलिंदत्त्वैवमपरमञ्जलिद्वयं पित्रेदद्यात् ततश्चदको गोत्रो
स्मत्पितामह अमुक शर्मातृप्यतामिदंजलंतस्मैस्वधा एवमपरमञ्जलिद्वयंपितामहायदद्या
ततः प्रसेकाख्यंकर्मकुर्यात् तद्यथा उदीरतामित्यादि षड्र्चपर्यन्तं मधुवाताइति त्र्यृचपर्य
न्तं यथाक्रमं मंत्रानुपांशूच्चारयन्स्वरेण पठन्नञ्जलिकृतापोजलापिकरणेप्रक्षिपेत् उदीर·
तामङ्गिरसआयन्तुन इतितिसृणां शङ्खप्रजापतिर्ऋषिः पितरोदेवता त्रिष्टुप्छन्दः ऊर्जं व
मित्यस्य प्रजापतिऋषिः आपोदेवता विराट्छन्दः पितृभ्य इत्यस्य प्रजापत्याश्विसरस्वत्यऋष

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

यः पितरोदेवता यज्ञियेचेहेत्यस्य प्राजापत्याश्चिमरस्वत्यऋषयः पितरोदेवता त्रिष्टुप्छन्दः
मधुवाताइतितिसृणां गोतमऋषिः विश्वेदेवादेवता गायत्रीछन्दः सर्वेषांमन्त्राणां प्रसेकार्थे
कर्मणिविः ॐउदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः असुंयऽईयुरवृकाऽऋत
ज्ञास्तेनोवन्तुपितरोहवेषु १ ॐअङ्गिरसोनः पितरोनवग्वाअथर्वाणोभृगवः सोम्यासः तेषांव
यंठंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम २ ॐआयन्तुनः पितरः सोम्यासोग्निष्वात्ताः
पथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ३ ॐऊर्जंवहन्तीरमृतङ्घृ-
तम्पयः कीलालम्परिस्रुतम् स्वधास्थतर्पयतमेपितॄन् ४ ॐपितृभ्यः स्वधायिभ्यः स्वधानमः
पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरोमीम
दन्तपितरोतीतृपन्तपितरः पितरः शुन्धध्वम् ५ येचेहपितरोयेचनेहयांश्चविद्मयांऽउचनप्र
विद्मत्वंवेत्थयतितेजातवेदः स्वधाभिर्यज्ञंठंसुकृतंजुषस्व ६ मधुवाताऽऋतायतेमधुक्षर
न्तिसिन्धवः माध्वीर्नः सन्त्वोषधीः ७ मधुनक्तमुतोषसोमधुमत्पार्थिवंठंरजः मधुद्यौरस्तुनः
पिता ८ मधुमान्नोवनस्पतिर्मधुमाँ २ अस्तुसूर्यः माध्वीर्गावोभवन्तुनः ९ ततःतृप्यध्वं १
इत्यञ्जलित्रयंपित्रादिभ्योदद्यात् ततोमातृतर्पणंकुर्यात् तथाचक्रममाहव्यासः पितृभ्यःप्रा
थमंदद्यात्ततोमातृभ्यएव ततोमातामहानाञ्च तत्पत्नीनां ततोजलं मरीचिः अन्नर्मातामा
हान्कृत्वा मातृणांयः प्रयच्छति उदकंपिण्डदानञ्चनरकंसतुगच्छति मातृतर्पणेविशेषः

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

यथा अमुकगोत्राऽस्मन्माता अमुकदेवीतृप्यतामिदंजलंतस्यैस्वधा एवंद्विर्दयात् अमुकगोत्रास्म
त्पितामही अमुकदेवीतृप्य० अमुकगोत्रास्मत्प्रपितामही अमुकदेवीतृप्य० इतिवाक्येनमा
त्रादिभ्यस्त्रीस्त्रीनञ्जलीन्दयात् **वृद्धशातातपः** मातृप्रमुखेभ्यस्तिस्रस्तासांदद्याज्ज
लाञ्जलीन् स्त्रींस्त्रीनेव तथान्यासांदद्यादेकैकमञ्जलिमिति ततोनमोवइत्यस्यप्रजापति
ऋषिः रसशोषजीवस्वधाघोरमन्यवःपितरोदेवतापाठेविनि० ॐनमोवःपितरोरसाय नमो
वःपितरःशोषाय नमोवःपितरोजीवाय नमोवःपितरःस्वधायै नमोवःपितरोघोराय नमोवःपि
तरोमन्यवे नमोवःपितरःपितरो नमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवा
सः १ इतिपठित्वा अमुकगोत्रोस्मन्मातामह अमुकशर्मातृप्यतामिदंजलंतस्मैस्वधा इति
मातामहायाञ्जलित्रयंदयात् अमुकगोत्रोस्मत्प्रमातामहो अमुकशर्मातृ० धा इति प्रमाता
महायाञ्जलित्रयंदयात् अमुकगोत्रोस्मद्वृद्धप्रमातामहो अमुका० स्वधा इतिवृद्धप्रमा० द
यात् ततःअमुकगोत्रास्मन्मातामही अमुकदेवीतृप्य० धा इतिमातामह्यै० अमुकगोत्रास्म
त्प्रमातामही अमु० धा इति प्रमाता० अमुकगोत्रास्मद्वृद्धप्रमातामही अमु० स्वधा इतिवृद्ध
प्रमातामह्यैः एकैकमञ्जलिंदयात् ततःआचार्यादीन्नामगोत्रस्वधाकारैस्तर्पयेत् आचार्यप
त्नीभार्याश्वश्रूपितृव्यतत्पत्नीमातुलतत्पत्नीसख्यादिनृस्तर्पयेत् अमुकगोत्रास्मद्गुरवमु
कःशर्मातृप्यतांमिदंजलंतस्मैस्वधा अमुकगोत्रास्मद्गुरुपत्नीअमुकदेवीतृप्यतामिदंजलंत

CC-0 Residence of Asif Sahib Pulwama. Digitized by eGangotri

स्मैस्वधेत्यादि ततोयेबान्धवाबान्धवावायेन्यजन्मनिबान्धवाः तेसर्वेतृप्तिमायान्तुयेचास्मत्तोयकां
क्षिणः येमेकुलेलुप्तपिण्डाःपुत्रदाराविवर्जिताः तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकं आब्रह्म
स्तम्बपर्यन्तंदेवर्षिपितृमानवाः तृप्यन्तुपितरःसर्वेमातृमातामहादयः अतीतकुलकोटीनां सा
प्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं इतिमन्त्रैःपृथक्पृथक्तिलमु
दकंदद्यात् इतिवामाञ्जलिंदद्यात् योगियाज्ञवल्क्यः वस्त्रंनिष्पीडितंतोयंस्नातस्योच्छिष्टभा
गिनां भागधेयंश्रुतिःप्राहतस्मान्नपीडयेज्जले ततःस्नानवस्त्रप्रान्तंनिष्पीडयेत् येकेचास्म
त्कुलेजाताअपुत्रागोत्रिणोमृताः तेगृह्णन्तुमयादत्तंवस्त्रनिष्पीडनोदकं एवंस्नानवस्त्रंनिष्पी
ड्याप्रागुदग्वा तर्पणार्थंकुशान् परित्यज्य यज्ञोपवीतीभूत्वाचम्यजले ब्रह्मादिदेवानावाह्य वरु
णान्तांस्तल्लिङ्गमन्त्रैर्यथासम्भवोपचारैश्चन्दनाक्षतपुष्पादिभिर्ब्रह्मादिवरुणान्तानर्चयेत् तेमन्त्राय
था ब्रह्मयज्ञानमितिप्रजापतिर्ऋषिर्ब्रह्मादित्योदेवता त्रिष्टुप्छन्दः पूजनेवि० ओंब्रह्मयज्ञानम्प्रथ
मम्पुरस्ताद्विसीमतःसुरुचोवेनआवः सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः १
ओंब्रह्मणेनमः ओंइदंविष्णुरितिमेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दः पूजनेविनि० ओं
ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपांसुरेस्वाहा २ ओंविष्णवेनमः नमस्तइत्यस्य
परमेष्ठीऋषिः रुद्रोदेवता गायत्रीछन्दः पूजनेवि० नमस्तेरुद्रमन्यवउतोतइषवेनमः बाहु
भ्यामुततेनमः ३ ओंरुद्रायनमः अपांसप्ताः तत्सवितुरिति विश्वामित्रऋषिः सवितादेवता।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

गायत्रीछन्दः सूर्यजपे विनियोगः ॐतत्सवितु० ४ ॐसवित्रे नमः मित्रस्येत्यस्य विश्वामित्रऋषिर्मि
त्रो देवता गायत्रीछन्दः जपे विनियोगः ॐमित्रस्य चर्षणीधृतो वो देवस्य सानसि द्युम्नं चित्रश्रव
स्तमम् ५ ॐमित्राय नमः इमम्मेत्यस्य शुनःशेप ऋषि र्वरुणो देवता गायत्रीछन्दः जपे विनि
योगः ॐइमम्मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके ६ ॐवरुणाय नमः एवं ब्रह्मा
दिदेवानर्चयित्वोत्थायोदुत्यमस्य हंसः शुचिषदित्येताभ्यां सूर्यमुपतिष्ठेत् उदुत्यमेत्यस्य
प्रस्कण्वऋषिः सविता गायत्रीछन्दः सूर्योपस्थाने विनियोगः ॐअदृश्रमस्य केतवो वि रश्मयो
जनाँ २ ऽअनु भ्राजन्तोऽग्नयो यथा उपयामगृहीतोसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्या
य त्वा भ्राजाय सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोहं मनुष्येषु भूयासम् हंसः शुचिषदित्यस्य
वामदेवऋषिः सविता देवता अतिजगतीछन्दः सूर्योपस्थाने विनियोगः ॐहंसः शुचिषद्वसु
रन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा
ऋतं बृहत् ततः सूर्यं पूर्ववत्प्रदक्षिणीकृत्यादित्याय नमः इति नमस्कृत्य वक्ष्यमाणैर्यथार्थैस्ते
र्नाममन्त्रैः प्राच्यादिदिशस्तत्तद्दिग्देवताश्च नमस्कुर्यात् ॐप्राच्यै दिशे नमः ॐइन्द्राय नमः ॐ
इन्द्राय नमः ॐआग्नेय्यै दिशे नमः अग्नये नमः ॐदक्षिणायै दिशे नमः यमाय नमः ॐनैर्ऋत्यै
दिशे नमः निर्ऋतये नमः ॐप्रतीच्यै दिशे नमः वरुणाय नमः ॐवायव्यै दिशे० वायवे नमः
ॐउदीच्यै दिशे० सोमाय नमः ॐऐशान्यै दिशे० ईशानाय नमः ॐऊर्ध्वायै दिशे० ब्रह्मणे नमः

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ॐ अवाच्यै दिशे० अनन्ताय नमः इति दिशो देवताश्च प्रणम्योपविशेत् ततो ब्रह्मादिवरुणपर्यन्तेभ्य
एकैकस्मै नमस्कुर्यात् अथवा योगियाज्ञवल्क्यमतेन उदकाञ्जलिं दद्यात् तद्यथा ॐ ब्रह्मणे
नमः अग्नये० पृथिव्यै० ॐ ओषधीभ्यो० वाचे० वाचस्पतये० विष्णवे० महद्भ्यो० अपांपतये०
ॐ वरुणाय नमः एवं नमस्कारं कृत्वोदकं दत्वाञ्जलिना जलमादाय संवर्च्चसेति मन्त्रेण मुखं संस्
पृश्य देवा गातुविदिति मन्त्रेण स्नानादिकर्माङ्गभूतदेवता विसर्जयेत् संवर्च्चसेति परमेष्ठी ऋषि
स्त्वष्टा देवता त्रिष्टुप्छन्दः मुखमार्जने विनियोगः ॐ संवर्च्चसा पयसा सन्तनूभिरगन्महि मनसा
सां शिवेन त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् देवा गातुविदिति मन्त्रस्य वाच
स्पतिः ऋषिर्वातो देवता विराट्छन्दः कर्माङ्गदेवताविस० ॐ देवा गातुविदो गातुं वित्वा गातु
मित मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः एवं विधिना जीवत्पितृकेनापि ब्रह्मादिचित्रगु
प्तपर्यन्तं तर्पणं कृत्वा स्वपित्रादितर्पणं वस्त्रनिष्पीडनञ्च वर्जयित्वा ब्रह्मार्चनादिस्नानादिकर्मा
ङ्गभूतदेवताविसर्जनपर्यन्तं तर्पणविधिः विधेयः न जीवत्पितृकः कुर्याद्वस्त्रनिष्पीडनं त्वथ इति
न जीवत्पितृकः कुर्यात् कृष्णैस्तिलैश्च तर्पणमिति लौगाक्षिवचनात् वस्त्रनिष्पीडनं पर्वादौ न भ
वति द्वादश्यां पञ्चदश्यां च संक्रान्तौ श्राद्धवासरे वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेदिति स्मृ
तेः केचित्तु नर ऋषितर्पणविधिनात् स्नानान्तरतर्पणमध्ये वस्त्रनिष्पीडनं नेच्छन्ति योगिया
ज्ञवल्क्यवचनात् यावद्देवानृषींश्चैव पितॄंश्चैव न तर्पयेत् तावन्न पीडयेद्वस्त्रं येन स्नातो भवेत् ।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

२८

दके निष्पीडयति यः पूर्वं स्नानवस्त्रमतर्पिते निराशाः पितरो यान्ति शापं दत्वा सुदारुणामिति ॥
निषेधवचनात्तदनुचितं वस्त्रनिष्पीडनविषये यन्निषेधवचनं तत्तु हि विशेषतात्तद्विषयमेवे
ति प्रतीतत्वाद्वस्त्रनिष्पीडनं स्नानोत्तरतर्पणमध्ये एव कुर्यादिति श्रीदीक्षितकामदेवकृतो॥
त्सर्गकारिकाटिप्पणौ प्रतिपादितं केचित्स्नानकर्माङ्गभूतदेवता विसर्जनमन्त्रमेच्छन्ति तदा
प्ययुक्तं युक्तं तु स्नानविधेः कर्मान्तरत्वाद्विसर्जनस्य तद्देवताविषयत्वस्य विसर्गे स्नानविधिं
समापयेदित्यपि कामदेवदीक्षितकारिकाटिप्पण्यां प्रतिपादितं एवमुक्तविधिना नित्यस्नाना
मध्याह्निकसन्ध्यातर्पणानि समाप्य वस्त्रमात्रप्रकारेण सन्ध्यतीसहिता गौतमादीन् सप्तर्षी
न् सप्रवरान् स्थापयेत् ॥ इति श्रीमन्महाराजाधिराजश्रीरणवीरसिं
हभूपालाज्ञया जनार्दनभट्टेन पारस्करसूत्रानुसारतः संगृहीता स्नान
विधिपद्धतिः समाप्तिमगमत् शुभम् भूयात् ॥:

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

३७ **ॐ अथ ऋषिस्थापनपूजनप्रकारः** कथ्यते सप्तर्षीणां तत्र कारिका स्थापयेदृष्यरुन्धतीं
पूर्ववच्च ततो धीमान् कुर्यात्तेषां प्रतिष्ठितिं इति कारिकार्थः स्थापयेदृष्यरुन्धतीमित्यत्र तत्रेत्यनुवर्तते
तस्मिन् कर्मणि अरुन्धतीसहितान् सप्तऋषीन् पूर्ववच्च अङ्गुष्ठमात्रान् कृत्वा स्थापयेत् यदा ऋष्या
रुन्धतीति पाठस्तदा समाहारद्वन्द्वैकवद्भावः ततश्च नपुंसकत्वादीकारस्य ह्रस्वता च यदा ऋष्या
रुन्धतीमिति पाठस्तदा ऋषिभिः सहिता अरुन्धतीति समासः कुर्यात्तेषां प्रतिष्ठितिमिति पाठे हि
यांक्तिन् यदा प्रतिष्ठितमिति पाठस्तदा भावे क्तः ततः स्थापनोत्तरं तेषां गोतमादीनां सप्तर्षीणां
मनोज्ञातिरिति मन्त्रेण प्रतिष्ठां कुर्यादित्यर्थः तथा च रेणुकारिका प्रतिष्ठाथ मनोज्ञातिरिति
मन्त्रं समुच्चरन् इमावेवेति यजुषा नामान्येषां विनिर्दिशेदिति कारिकार्थः स्थापनोत्तरं गोतमा
दि सप्तर्षीणामिमामेवेति यजुषा नामसङ्कीर्तयेदित्यर्थः इमावेवेत्यत्रोक्ता एव पूजनीयाः गोत
मादीनिमुदाहृतवाक्यात् **अथ ऋषिस्थापनक्रमः** कर्ता पूर्वं त्रिभिस्त्रिभिर्दर्भपवित्रैः पृथ
क्पृथक् गायत्रीं पठित्वा ब्रह्मग्रन्थियुक्ताः सप्तर्षिवटवः कार्याः ततः पीठे प्रागग्राः स्थापनीयाः तत
आचम्य प्राणायामान् कृत्वा कुशाकुसुमयवजलपाणिर्देशकालौ सङ्कीर्त्य अध्यायोत्सर्गकर्माङ्गत्वेन ऋ
षिस्थापनपूजनमहं करिष्ये इति **संकल्पं कुर्यात्** ततश्च तत्तान् गृहीत्वा ॐ भूर्भु
वः स्वः गोतममावाहयामि स्थापयामि भो गोतम इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः भरद्वा
ज मावाहयामि स्थापयामि भो भारद्वाज इहागच्छ ॥ ॥ इह तिष्ठ ॥ ॥

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ॐभूर्भुवः स्वः विश्वामित्रमावाहयामि स्थापयामि भोविश्वामित्र इहागच्छेहतिष्ठ ॐभूर्भुवःस्वःजम
दग्निमावाहयामिस्थापयामिभोजमदग्ने इहागच्छेहतिष्ठ ॐभूर्भुवःस्वःवसिष्ठमावाहयामिस्थाप
यामि भोवसिष्ठ इहागच्छेहतिष्ठ ॐभूर्भुवःस्वःकश्यपमावाहयामि भोकश्यप इहागच्छेहति
ष्ठ ॐभूर्भुवःस्वःअत्रिमावाहयामि स्थापयामि भोअत्रेइहागच्छेहतिष्ठ ॐभूर्भुवःस्वःअरुन्धतीमा
वाहयामिस्थापयामि भोअरुन्धति इहागच्छेहतिष्ठ एवं सप्तर्षीनावाह्य स्थापयित्वाऽक्षताना
दायमनोजूतिरिति मन्त्रेणप्रतिष्ठांकुर्यात् ॐमनोजूतिरित्यस्याङ्गिरसोबृहस्पतिऋषिर्यजुर्विश्वेदेवा
देवता ऋषिस्थापने विनियोगः ॐमनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञं॥
समिमन्दधातु विश्वेदेवासइहमादयन्तामोंप्रतिष्ठ १ अरुन्धतीसहिताःसप्तऋषयः सुप्रतिष्ठिता
भवं त्विमञ्चार्याऽक्षतान् प्रक्षिपेत् एवंप्रतिष्ठाप्यसप्तर्षय इदंविष्णुर्विचक्रमे इतिमन्त्राभ्यांषोडशो
पचारैः सप्तर्षीनर्चयेत् तत्रकारका अक्षिलान्स्नापयेद्विप्रान् सप्तऋषयइत्यृचा अर्चयेत्तेभ्यःप्रदा
तव्यःपूजनंचंदनादिभिः १ नैवेद्यैर्विविधैःपूज्यावेदस्याहितमिच्छता ऋषीणांप्रीतयेदद्याउपवीता
न्यनेकशः २ प्रणाम्यचमुनीन्भक्त्यातर्पणञ्चसमारभेत् ३ कारिकार्थः अक्षिलानिति तीर्थोदकेस्ना
न्विष्णुरूपान् सप्तर्षीन् स्नापयेदित्यर्थः तथा वेदकारिका मंत्राभ्यां सप्तऋषय इदंविष्णुर्विचक्रमे।
अर्चयेद्विष्णुरूपांस्तान् गन्धाद्यैसोपवीतकैरिति अर्चयेत्तेभ्य इतिवेदस्याहितमिच्छताऽस्नातेभ्यः स
प्तर्षिभ्यः अष्टांगोर्चैः प्रदातव्यः गन्धादिभिरुपचारैस्तेपूज्याः बहुप्रकारैर्नैवेद्यैस्तेप्रीणनीयाः ऋ

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

वीणाप्रीतये दद्यादिति ऋषीणां प्रीत्यर्थं बहूनि ब्रह्मसूत्राणि समर्पयेदित्यर्थः ॥ तथा च मदनरत्ने
यज्ञोपवीतदानेन ब्रह्मवर्चस्वि जायते तस्मात्तानि प्रदेयानि ब्राह्मणेभ्यो विपश्चिता **नन्दिपुराणे**
यज्ञोपवीतदानेन सर्वेभ्यो ब्राह्मणाय वा भवेद्धि प्रस्रुतवेदः शुद्धधीर्नात्र संशयः प्रणम्येति प्रेमणा
मुनीन् सप्तर्षीन् नमस्कृत्य पूजनोत्तरं ऋषींस्तर्पयेदित्यर्थः **अथ ऋषिपूजनक्रमः** समा-
चारात् पूजनात् पूर्वं कर्ता सप्तऋषय इदं विष्णुर्विचक्रम इति मन्त्राभ्यां करादि मूर्द्धपर्यन्तं देहन्या-
सान् कुर्यात् ते यथा सप्तर्षय इत्यस्यादित्य याज्ञवल्क्याद् ऋषी सप्तऋषयो देवता जगतीछन्दः इदं
विष्णुरित्यस्य मेधातिथिर्ऋषिः विष्णुर्देवता न्यासे विनियोगः ॐ सप्तऋषयः प्रतिहिताः शरीरे स-
प्त रक्षन्ति सदमप्रमादम् सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च दे-
वौ १ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पांसुरे स्वाहा २ तथैव सप्तर्षिवेद्यां
न्यासं कुर्यात् ततः सप्तऋषय इदं विष्णुर्विचक्रम इति मन्त्राभ्यां काण्डानुसमयेन गौतमादीन्
पूजयेत् तत्रैवं प्रयोगः गौतमायासनं समर्पयामि एवं पाद्यमर्घ्यमाचमनीयं स्नानादिस्तुतिपाठा-
न्तं गौतमं संपूज्य भारद्वाजादीन् पूजयेदेवमेव **अथवा** पदार्थानुसमयेन गौतमादीन् पू-
जयेत् तत्रैवं प्रयोगः गौतमाय पाद्यं एवं भरद्वाजादिभ्यः उपचाराः ततः समाचारात् सर्वसप्तर्वरान्
पञ्चोपचारैः पूजयेत् **ततः सप्तर्षींस्तर्पयेत् तत्र मदनरत्ने** ऋषिर्देवाश्छन्दांसि वेदानृ-
षीन् पुराणाचार्यान् गन्धर्वानितराचार्यान् संवत्सरं च सावयवं पितॄनाचार्यानिति **सूत्रार्थः** सि

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

प्यणोः सहाचार्यो देवादीन्तर्पयेत् तथा च कारिका देवांश्छन्दांसि वेदांश्च सनातनानृषींस्तथा ता
था पुराणाचार्यांश्च गन्धर्वानितरांस्तथा ६ अहोरात्रार्द्धमासांश्च मासानृतूंस्तथैव च संवत्सरं सा
वयवं स्वान्पितॄंस्तर्पयेदथ ७ आचार्यः तर्पणोः सार्द्धमयम्पुरश्च पञ्चभिः मंत्रैर्द्वाभ्यां च मूर्द्धेति मा
छन्दस्त्रितयेन च ८ एवं षोडशभिर्मन्त्रैः सप्तऋषय एकया चतुर्भिस्तर्पयेद्धंशौरिमावेवेत्यनेन
वेति ९ कारिकार्थवेदानिति आचार्यशिष्या देवांश्छन्दांसीत्यादिना पितॄनाचार्यानित्यं तान्सू
त्रोक्तदेवांस्तर्पयेयुरित्यर्थः अथेति सूत्रोक्त देवता तर्पणानन्तरमयं पुर इत्यादी मावेवेत्यं ते
न यजुषा मन्त्रोक्तदेवतास्तर्पयेयुरित्यर्थः तथा च कात्यायनः गोतमादीनृषीन्सप्तकृत्वा
दर्भमयावयुनः पूजयित्वा विधानेन तर्पयेच्च मुञ्चरानिति अस्य ग्रहणं यजुरादीनाम् उपल
क्षणार्थं अत एव कारिकाकारेण माछंद इत्यादीनि यजूंष्युक्तानि आचार्यशिष्याः स्वपित्रादीन्त
र्पयेयुः तत्सूत्रे स्वांश्च तर्पयेयुरिति तथा च कारिकास्वान्पितॄंस्तर्पयेदथेति अथेत्यनन्त
रं सूत्रविहित तर्पणानन्तरमित्यर्थः आचार्य तर्पणोः सार्द्धमिति देवादितर्पणैः सहाचार्य तर्पणं
न पूर्वं तर्पणाव पितृतर्पणोन्तरमित्यर्थः तत आचार्यशिष्या अयं पुर इत्यादि पंचभिर्द्वे इत्यादि द्वा
भ्यां माछंद इत्यादि त्रिभिरेव छन्द इत्यादि षोडशभिः सप्तऋषय इत्येकया अथ वर्द्धेशः समाना
मासां जीवीत्यादि चतुर्भिर्विश्वापा [illegible] रिमावेवेत्येकेन यजुषा देवतीर्थेन ऋषींस्तर्पयेयुः ततः स्वा
पित्रादींस्तर्पयेयुः जीवत्पितृकेण देवाद्याचार्य तर्पणान्तं तर्पणं कर्तव्यं ततः पितृ।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

५८ तर्पणं विदाय मंत्रोक्तदेवांस्तर्पयेत् **अथ ऋषितर्पणक्रमः** कृतऋजुकुशोपग्रहाग्रा
चार्यशिखादेवतीर्थेनापोगृहीत्वा ऋषींस्तर्पयेयुः ओं देवास्तृप्यन्तां छंदांसि तृप्यन्तां वेदास्तृप्य
न्तां पुराणाचार्यास्तृप्यंतां गंधर्वास्तृप्यन्तां. इतराचार्यास्तृप्यन्तां संवत्सरस्सावयवस्तृप्यन्तां ॥
आचार्यास्तृप्यन्तां ततः प्राचीनावीती भूत्वा दक्षिणाग्रान्कुशान्धृत्वाञ्जलिनापो गृहीत्वा तिलाक्ष
तैयुक्ताः दक्षिणस्रवेन पितृतीर्थेन नामगोत्रोच्चारणपूर्वकं पित्रादींस्तर्पयेयुः **जीवत्पितृका**
स्तु आग्नेयकोणात् कृतापसव्यास्तिलमिश्राभिरद्भिराचार्यस्य पित्रादीन्तर्पयेयुस्तत्रैवं प्रकारः ॥
गोत्रा आचार्यपितरस्तृप्यन्तु स्वधेति प्रयोगः ततो यज्ञोपवीती भूत्वा पुरुषस्येत्यादि मंत्रैर्मंत्रो
क्तदेवतां तर्पयेयुः **तत्रैवं प्रकारः** कर्ता पाणौ कुशतिलजलान्यादाय गोत्रा अस्मत्पितृपि
तामह प्रपितामह देवदत्त यज्ञदत्त विष्णुदत्त शर्माणः तृप्यध्वं स्वधा एवं मात्रादिभ्यः मातामहादिभ्यो दद्युः अयं पुरुष आदि पंचानां साध्या ऋषयो यजूंषि प्राणाम्भतो देवताः मूर्धादि द्वयोर्देवा ऋष
योयजूंषि लिंगोक्ता देवताः एवछन्द आदिषोडशानां परमेष्ठी ऋषिर्यजूंषि लिङ्गोक्तदेवता ऋ
षितर्पणे विनियोगः सप्तऋषय इत्यस्यादित्ययाज्ञवल्क्यावृषी सप्तऋषयो देवता जगतीछंदः
ऋषितर्पणे विनियोगः ओं अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती
गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत् त्रिवृतो रथन्तरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्रा
णं गृह्णामि प्रजाभ्यः १ अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

४२ ष्मीत्रिष्टुभः स्वारꣳस्वारादन्तर्यामोन्तर्यामात्पंचदशः पंचदशाद्बृहद्भरद्वाजऋषिः प्रजापतिगृहीतया
त्वया मनो गृह्णामि प्रजाभ्यः २ अयंपश्चात् अयंपश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यचसंवर्षाश्चाक्षुष
ष्यो जगती वार्षी जगत्याऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निऋषिः प्र
जापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ३ इदमुत्तरात्स्वस्तस्य श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टु
प्शारद्यनुष्टुभः ऐडमैडान्मन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजं विश्वामित्रऋषिः प्रजाप
तिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ४ इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः
पङ्क्तिर्हैमन्ती पंक्त्यै निधनवन्निधनवतः आग्रयणः आग्रयणात्त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्र
यस्त्रिꣳशाभ्याꣳ शाक्वररैवते विश्वकर्मऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्र
जाभ्यो लोकन्ताऽइन्द्रम् ५ मूर्द्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोऽधिपतिश्छ
न्दो विश्वकर्मा वयः परमेष्ठी छन्दो वस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो व
यस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिꣳहो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः
ककुप्छंदः ऋषभो वयः सतोबृहती छंदो नडान्वयः ६ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो
जगतीछन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः पंचाविर्वयो गायत्री छन्दस्त्रिवत्सो
वयऽउष्णिक्छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दो लोकन्ताऽइन्द्रम ७ माछंदः प्रमाछंदः प्रतिमा
छन्दोऽस्रीवयश्छन्दः पंक्तिश्छन्दऽउष्णिक्छन्दो बृहतीछंदोऽनुष्टुप्छन्दो विराट्छन्दो गायत्री

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

४३ छन्दस्त्रिष्टुप्छन्दो जगती छन्दः पृथिवी छन्दः ८ पृथिवी छन्दोन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छ।
न्दो नक्षत्राणि छन्दो वाक्छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोजाश्छन्दोश्वश्छन्दः ९ अग्नि
र्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो दे
वता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता १० एवश्छन्दो वरिवश्छन्दः शम्भू
श्छन्दः परिभूश्छन्दः आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः॥ सलिरं
छन्दः॥ ककुप्छन्दस्त्रिककुप्छन्दः काव्यं छन्दो ऽङ्कुपं छन्दोक्षरपङ्क्तिश्छन्दः पदपङ्क्ति
श्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दः आच्छच्छन्दः ११ आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वि
यच्छन्दो बृहच्छन्दो रथन्तरं छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः संस्तुप्छन्दो
ऽनुष्टुप्छन्दः एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छ
न्दो दूरोहणं छन्दस्तन्द्रं छन्दो ऽङ्काङ्कं छन्दः १२ रश्मिना सत्याय सत्यं जिन्व प्रेतिना धर्मणा
धर्मं जिन्वान्वित्या दिवा दिवं जिन्व सन्धिनान्तरिक्षेणान्तरिक्षं जिन्व प्रतिधिना पृथिव्या पृथिवीं
जिन्व विष्टम्भेन वृष्ट्या वृष्टिं जिन्व प्रवयाह्नाहर्जिन्वानुया रात्र्या रात्रीं जिन्वोशिजा वसुभ्यो वसू
ञ्जिन्व प्रकेतेनादित्येभ्य आदित्याञ्जिन्व तन्तुना रायः १३ तन्तुना रायस्पोषेण रायस्पोषं जिन्व॥
संसर्पेण श्रुताय श्रुतं जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व वयोधसा
धीतेनाधीतं जिन्वाभिजिता तेजसा तेजो जिन्व १४ प्रतिपदसि प्रतिपदे त्वानुपदस्यनुपदे त्वा सं

मादसि सम्यदे त्वा तेजोऽसि तेजसे त्वा त्रिवृदसि २५ त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा विवृद-
सि विवृते त्वा विवृदसि विवृते त्वा सवृदसि सवृते त्वाऽऽक्रमोऽस्याक्रमाय त्वा संक्रमोऽसि संक्रमाय त्वो-
त्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वाधिपतिनोर्जोर्जं जिन्व २६ राज्ञ्यसि प्राची दिग्वसवस्ते दे-
वाऽअधिपतयोऽग्निर्हेतीनां प्रतिधर्त्ता त्रिवृत्त्वा स्तोमः पृथिव्याᳪं श्रयत्वाज्यमुक्थमव्यथायै स्तभ्ना-
तु रथन्तरᳪं साम प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्र-
थन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च साद-
यन्तु २७ विराडसि दक्षिणा दिग्रुद्रास्ते देवाऽअधिपतयऽइन्द्रो हेतीनां प्रतिधर्त्ता पञ्चदशस्त्वा स्तोमः
पृथिव्याᳪं श्रयतु प्रऽउगमुक्थमव्यथायै स्तभ्नातु बृहत्साम प्रतिष्ठित्याऽअन्तरिक्षऽऋषय-
स्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदा-
ना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु २८ सम्राडसि प्रतीची दिगादित्यास्ते देवाऽ-
अधिपतयो वरुणो हेतीनां प्रतिधर्त्ता सप्तदशस्त्वा स्तोमः पृथिव्याᳪं श्रयतु मरुत्वतीयमुक्थम-
व्यथायै स्तभ्नातु वैरूपᳪं साम प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषु दिवो मा-
त्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके
यजमानञ्च सादयन्तु २९ स्वराडस्युदीची दिङ्मरुतस्ते देवाऽअधिपतयः सोमो हेतीनां प्रति-
धर्त्तैकविᳪंशस्त्वा स्तोमः पृथिव्याᳪं श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजᳪं साऽ

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

मप्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादय-
न्तु २० अधिपत्न्यसि बृहती दिग्विश्वे ते देवाऽअधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्त्ता त्रिणवत्रयस्त्रिं-
शौ त्वा स्तोमौ पृथिव्याᳫं श्रयतां वैश्वदेवाग्निमारुते उक्थेऽअव्यथायै स्तभ्नीताᳫं शाक्वररैव-
ते सामनी प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विध-
र्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु २१ अय-
म्पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ पुञ्जिकस्थला च कृत-
स्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते ॥
नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः २२ अयन्दक्षिणा विश्वकर्म्मा तस्य रथ-
स्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ मेनका च सहजन्या चाप्सरसौ यातुधाना हेती रक्षाᳫंसि प्रहे-
तिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः २३ अय-
म्पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ प्रम्लोचन्ती चानुम्लोचन्ती चाप्सर-
सौ व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि त-
मेषाञ्जम्भे दध्मः २४ अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ विश्वाची
च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्वि।
ष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः २५ अयमुपरि अयमुपर्य्यर्वाग्वसुस्तस्य सेनजिच्च सुषेण

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

स्वसेनानीग्रामण्यौ उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन् हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमोऽस्तु ते नो [illegible]
नोऽस्मद्व्यन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः २९ मन्त्रोक्ता ऋषयस्तृप्यन्तां ॐ अथ वा
०९ श्वः समानमासां जीवीपुत्रान्माङ्गीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः ॥
कौत्सात्कौत्सो माहित्थेर्वामकक्षायणाद्वामकक्षायणो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कु
श्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजा
पतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः १ वंशोक्ता ऋषयस्तृप्यन्तां १ अथ वंशः
स्तादिदं वयं शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पा
राशर्यः सांकृत्याच्च भारद्वाजाच्चौदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौत
मो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनः शौनकाच्चात्रेयाच्च रै
भ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात् कौण्डिन्यः कौ
ण्डिन्यात् कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च २ आग्निवेश्यः सैतवात्सैतवः पाराशर्यात्पारा
शर्यो जातूकर्ण्याद्भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वा
जाद्भारद्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौ
शिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भार
द्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौप

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

जन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयात् ३ आत्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो
गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्
कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपा
द्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वा
ष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दै
वादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचि
त्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमे
ष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः **वंशोक्ताक्षरपदस्थयस्त्वतो** ४ अथ वंशस्तदिदं वय
वं शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः सांकृ
त्याच्च भारद्वाजाच्च भारद्वाज औदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वै
जवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्च जैव
न्तायनाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्याभ्यां कौण्डि
न्यावौर्णवाभेभ्य और्णवाभाः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ११
आग्निवेश्यः सैतवात्सैतवः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वा
जो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वलाकाकौशिकाद्वलाकाकौशिकः का

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

श्वायणात् काषायणात् सौकरायणात् सौकरायणस्त्रैवणेः त्रैवणिरौपजन्धनेः औपजन्धनिः सायकाय
नात् सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकात् घृतकौशिकः पाराशर्यायणात् पारा
शर्यायणः पाराशर्यात् पाराशर्यो जातूकर्ण्यात् जातूकर्ण्यो भारद्वाजात् भारद्वा
जो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेः त्रैवणिरौपजन्धनेः औपजन्धनिरासुरेः आसुरिर्भार
द्वाजात् भारद्वाज आत्रेयात् २ आत्रेयो आत्रेयो माण्टेः माण्टिर्गौतमात् गौतमो गौतमात् गौतमो
वात्स्यात् वात्स्यः शाण्डिल्यात् शाण्डिल्यः कैशोर्यात् काप्यात् कैशोर्यः काप्यः कुमारहरितात् कुमार
हरितो गालवात् गालवो विदर्भीकौण्डिन्यात् विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवात् वत्सनपाद्बाभ्रवः प
थः सौभरात् पन्थाः सौभरोऽयास्यादाङ्गिरसात् अयास्य आङ्गिरस आभूतेस्त्वाष्ट्रात् आभूतिस्त्वाष्ट्रो विश्व
रूपात्त्वाष्ट्रात् विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवाद
थर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात् प्रध्वंसन एकर्षेः एकर्षिर्विप्रचित्ते
र्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात् सनातनः सनगात् सनगः परमेष्ठिनः परा
मेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ३ वंशो काण्डद्वयस्य समाप्तः अथ वंशं प्रास्तदि
दं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः पाराशारीपुत्रात्पा
राशारीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशारीकौण्डिनीपुत्रात् पाराशारीकौण्डिनीपुत्रो गार्गीपु
त्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो वाडेयीपुत्राद्वाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो हारि

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

कार्शीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौ
नकीपुत्रः १ **काश्यपी** बालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौत्सीपुत्रात् कौ ॥
त्सीपुत्रो बौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणी
पुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्रा
द्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वा
र्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपु
त्रः २ **आलम्बी**पुत्रादालम्बीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्ती
पुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो
राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रो भाल
कीपुत्राद्भालकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः कार्शकेयो
पुत्रात्कार्शकेयीपुत्रः ३ **प्राश्नीपुत्रादासुरिवासिनः** प्राश्नीपुत्र आसुरायणादासुराय
ण आसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कु
श्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो वाध्योगाज्जिह्वावान्वाध्योगोऽसिताद्वार्षगणादसि
तो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रु
वेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाज

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

स्नेयेन याज्ञवल्क्येनाख्यायते ४ **वंशोक्ता ऋषयस्तर्पणे** इमावेव गोतमभरद्वाजाव
यमेव गोतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव
वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचाह्यन्नमद्यते निर्हवै नामैतद्यदत्रिरि
ति सर्वस्यात्ता भवति सर्वस्यान्नं भवति य एवं वेद १ ब्राह्मणोक्ता **ऋषयस्तर्पणे आचार्या**
शिक्षा अयं त्र रश्त्यादि मावेत्यन्नैर्मंत्रब्राह्मणोक्तस्तर्पणं समापयेयुरिति पौषमासस्य रोहिण्या
मित्यत्र प्रयोगावसरे वासुदेवप्रभृतिनिबन्धकारा जीवत्पितृकस्य मातामहादितर्पणं लि
खितवन्तस्तदसमञ्जसम् वस्तुतस्तु यद्यपि पित्रादितर्पणे जीवत्पितृकस्य नाधिकारः प्रतीया
ते तद्वन्मातामहादितर्पणेऽप्यनधिकार एव यपि च जीवत्पितृर्नोक्तमिति **निगमवाक्यात्** ।
नापि च जीवत्पितृकः कुर्वीत कदाचनेति **वृद्धगार्ग्यमपि** कात्यायनः सपितुः पितृकृत्ये
षु अधिकारोन विद्यते न जीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतिः पितृकृत्यानि श्राद्धतर्प
णस्वधाकारपितृतृप्त्यर्थं दानानीति व्याख्यातं जीवत्पितृकसञ्चयेनत्था अन्यास्त्वेतर इति स्पष्ट
त्वेऽपि मृतपितृकस्यैव पित्रादितर्पणं सूत्रकारेणाप्रदर्शितं महानदीषु सर्वासु तीर्थेषु च गया
यां मृते जीवत्पितापि कुर्वीत श्राद्धं पार्वणाथ र्मवदिति वचनातिप्रसङ्गोऽप्यन्त्रान्ते यत्र प्रतिप्रसवस्त
त्र भवति यथा जीवत्पितापि कुर्वीत तर्पणं यमभीष्म योरिति अन्येऽपि दोषाः अत्र जीवत्पितृक
निर्णये सन्ति परन्तु ग्रन्थगौरवभयान्न लिखिताः एवं ऋषितर्पणं विधाय आचार्यशिक्षा ॐकार

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

व्याहृतिपूर्वां सावित्रीं चतुःपठेयुः तत्र सूत्रे सावित्रीं चतरनुद्रुत्येति सूत्रार्थः साचार्याः सावित्रीं चतुःपठेयुः उत्तमा
र्थं सूत्रे सावित्रीं च तत्र वदनीति स्पष्टनिर्देशेन सावित्रीपठनाव्यवहितकाले विरताः स्मेति पठनं यद्यपि श्रुतं
तथाप्यन्तरसूत्रे प्रवचनं च पूर्ववदित्यत्र यथाप्रवचनं दृष्टं तथा कर्तव्यं तेन सावित्रीपठनानन्तरं समे
त्याध्यायादीन् प्रब्रूयुः स्वदन्ते विरताः स्मइति पठेयुरिति सिद्धं विरतोऽन्तरं पठनाभावात् तथा च कारिकाध्याय्याः पठे
युरिति सिद्धं विरतोऽन्तरं पठनाभावात् तथाचकारिकाशिष्याः पठेयुः सावित्रीं चतुः कृत्वाग्र
तः स्वयं उपाकृतिवन्मन्त्रांश्च प्रतावेयोजयेत्कवि १० सावित्रीं त्रिः समस्तार्थं ह्यध्यायांश्च प्रपाठ
कान् प्रातस्थानानन्तरमनुवाकादिकांश्च तथान्तिमा ११ अन्तिमाः कण्डिका ब्रूयाद्दशमीलेषु
रोहितम् इषेत्वेत्ययजुर्याद्दि शन्नो देवीरभिष्टये १२ सदनोऽस्त्विति मन्त्रश्च पश्चादुभाक्वीति
च ऋषिश्राद्धं ततः कृत्वा ब्राह्मणानां विसर्जनं १३ **कारिकार्थः** प्राङ्मुखो गुरुः स्वयं ॐकार
पूर्विकां सावित्रीं चतुःपठेत् प्रत्यङ्मुखोपविष्टाः शिष्याः समस्तं पठेयुः सावित्रीपठनान्तरम
ध्यायप्रपाठकप्रातानुवाककण्डिकान्त्यकण्डिकाप्रतीकानि पठेयुः तत्राचारमूले प्रतीकपठनं
किन्त्वध्यायादीन् प्रब्रूयादिति सूत्रे आदिग्रहणस्य प्रतीकोपादानं व्याख्यातं भिर्व्याख्यातं पुरा
पत्सर्ववेदोत्सर्गपद्ये ऋग्वेदोक्तान्यादित्यप्रत्यानि सामवेदोक्तानि पर्वाण्यथर्ववेदोक्तानि सू
क्तानि पठेयुः तत्र सूत्रं तृपतां प्रवचनं च पूर्ववत् उपाकर्मवदित्यर्थः **अथाध्ययनक्रमः**
प्राङ्मुखोपविष्टो गुरुः ॐकारपूर्वां सावित्रीं त्रिः पठित्वा प्रत्यङ्मुखोपविष्टः शिष्येभ्यो मन्त्रब्राह्म

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

णामीरध्यायादीन् पाठयेत् शिष्यायथोक्तमध्यायादीनधीयीरन् ॐभूर्भुवःस्वःतत्सवितुर्यात्
इषेत्वा १ कृष्णोसि २ समिधाग्निम् ३ देंस ४ अग्नेत्वन्नः ५ देवस्यत्वा ६ वाचस्पतये ७ उपा
यामगृहीतोसि ८ देवसवितः ९ अपोदेवाः १० युञ्जानःप्रथमम् ११ दृशानोरुक्मः १२ मयि
गृह्णामि १३ ध्रुवक्षितिर्ध्रुवयोनिः १४ अग्नेजातान् १५ नमस्ते १६ अश्मन्नूर्जम् १७ वाजश्च
१८ स्वाद्वींत्वा १९ क्षत्रस्ययोनिः २० इमम्मे २१ तेजोसि २२ हिरण्यगर्भःसम् २३ अश्वस्तूपरः।
२४ शादन्दद्भिः २५ अग्निश्च २६ समास्त्वा २७ होतायक्षत् २८ समिद्धोअञ्जन् २९ देवसवि
तः ३० सहस्रशीर्षापुरुषः ३१ तदेव ३२ अस्याजरासः ३३ यज्जाग्रतः ३४ अपेतः ३५ ऋचंवा
चम् ३६ देवस्यत्वा ३७ देवस्य ३८ स्वाहाप्राणेभ्यः ३९ ईशावास्यम् ४० इतिसंहिताध्यायाः।
अथपातानिइषेत्वा १ पवित्रे २ अग्नेनयः ३ उपयामगृहीतोसिसुशर्म्मासि ४ प्रथमावा
म ५ सोमस्यत्विषिः ६ परस्याअधि ७ अग्नावः ८ राक्षसि ९ नमोहिरण्यबाहवे १० इन्द्रो
मरु ११ इमौते १२ अन्नात्परिस्रुतः १३ अश्विनातेजसा १४ पृथिव्यैस्वाहा १५ प्रजापतयेच १६
तेऽअस्य १७ तनूनपात्पथः १८ अयमिह १९ अग्नेनः २० इयत्यग्रे २१ हिरण्मयेनशोबंपंचसा
प्ततिः ७५ कण्डिकाः व्रतमुपैष्यन् १ सर्वैकपालान्येवान्यतर उपदधाति २ सर्वैस्रुचःसंमा
र्ष्टि ३ हिङ्कृत्यान्वाह ४ सर्वैप्रवरायाश्रावयति ५ ऋतवोहवै देवेषुयज्ञेभागमीषिरे ६ स
वैपर्णशाखयावत्सानपाकरोति ७ मनवेहवैप्रातः ८ सयत्राह ९ ससयद्वाइतश्चेतश्च

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

सम्भरति १० उद्धृत्याहवनीयमग्न्याहुतिं जुहोति ११ सूर्यो देवा अग्निहोत्रं १२ अथ यदूतेऽग्निहोत्रउपतिष्ठ
ते १३ प्रजापतिर्हवा इदमग्र एक एवास १४ महाहविर्भावै देवा अहुत्रं जज्ञुः १५ देवयजने।
जोषयन्ते १६ दक्षिणेनाहवनीयं प्राचीनग्रीवेकृष्णाजिने उपस्तृणाति १७ सप्तपदान्यनुनिक्रा
मति १८ शिरो वै यज्ञस्यातिथ्यं बहुप्रायणीयोदयनीयौ १९ तद्यएषपूर्वार्ध्योविष्टम्भस्तृणारा
जो भवति २० उदरमेवास्य सदः २१ अग्निमादत्ते २२ तद्यन्नैतस्यहत्नोहोतानाहोत्रषदनउपविश
ति २३ प्रजापतिर्वै प्रजाः ससृजानो रिरिचान इवामन्यत २४ प्राणोहवा अस्योपांशुः २५ चक्षु
षीहवा अस्य शुक्रामन्थिनौ २६ भक्षयित्वा समुपहूताः सदस्युक्थोत्तिष्ठति २७ मनोहवा अस्य सवि
ता २८ आदित्येनचरुणोदयनीयेन प्रचरति २९ प्रजापतिर्वा एष यदंशुः ३० देवाश्च वा असुरा
श्च ३१ अथ स्रुवञ्चाज्यविलापनीञ्चादाय ३२ अरण्योरग्नीसमारोह्य ३३ केशवस्यश्मश्रु
३४ आग्नेयोऽष्टाकपालः पुरोडाशो भवति ३५ असद्वा इदमग्र आसीत् ३६ प्रजापतिरग्निरूपाण्य
भ्यध्यायत् ३७ एतद्वै देवा अब्रुवन् ३८ अथैनमतः खनन्त्येव ३९ पर्णकषायनिष्पक्वा एता आ
पो भवन्ति ४० भूयांसि हवींषि भवन्ति ४१ सरुक्मं प्रतिमुच्य विभर्ति ४२ वनीवाह्येताग्निं
विभृयादित्याहुः ४३ गार्हपत्यं चेष्यन् पलाशशाखया व्युदूहति ४४ अथातो नैर्ऋतीर्हरन्ति ४५
चितो गार्हपत्यो भवति ४६ आत्मन्नग्निं गृह्णीते चेष्यन् ४७ कूर्ममुपदधाति ४८ प्राणभृत
उपदधाति ४९ द्वितीयां चितिमुपदधाति ५० तृतीयां चितिमुपदधाति ५१ चतुर्थीं चितिमुपद

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

यानि ५२ पञ्चमीं चितिमुपदधाति ५३ नाकसद उपदधाति ५४ ऋतव्या उपदधाति ५५ अथातः शा
तरुद्रियं जुहोति ५६ उपवसथीयेऽहन्प्रातरुदित आदित्ये ५७ अथातो वैश्वानरं जुहोति ५८
अथातो राष्ट्रभृतो जुहोति ५९ अथातः पयोव्रततायै ६० अग्नीरेष पुरस्ताच्चीयते ६१ प्रजाप
तिः स्वर्गं लोकमजिगांसन् ६२ प्राणो गायत्री ६३ प्रजापतिं विस्रस्तम् ६४ तस्य वा एतस्या
ग्नेः ६५ अथ हैते कला ६६ संवत्सरो वै यज्ञः प्रजापतिः ६७ त्रिर्ह वै पुरुषो जायते ६८ प्राग्व
वा एतस्याग्निहोत्रस्याग्निहोत्री ६९ उद्दालको हारुणिः ७० उर्वशी हाप्सराः ७१ भृगुर्ह वै वारु
णिः ७२ पशुबन्धेन यजते ७३ तद्यथा ह वै ७४ अथ वै यज्ञो योऽयं पवते ७५ समुद्रमु वा एते प्र
तरन्ति ७६ यद्वा लोके ७७ दीर्घसत्रं ह वा एत उपयन्ति ७८ तदाहुर्य एष दीर्घसत्री ७९
सोमो वै राजा यज्ञः प्रजापतिः ८० विश्वरूपं वै त्वाष्ट्रमिन्द्रो हन् ८१ इन्द्रस्य वै यत्र ८२ एतस्मा
द्वै यज्ञात्पुरुषो जायते ८३ ब्रह्मौदनं पचति ८४ प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् ८५ प्र
जापतेरक्ष्यश्वयत् ८६ प्रजापतेरक्ष्यश्वयत् ८६ प्रजापतिरकामयत ८७ अथ ह ज्ञानगौतमस्य
८८ पुरुषो ह नारायणोऽकामयत ८९ ब्रह्म वै स्वयम्भु तपोऽतप्यत ९० अथास्मै श्मशानं कुर्व
न्ति ९१ देवा ह वै सत्रं निषेदुः ९२ अथातो रौहिणौ जुहोति ९३ स वै पत्नीयेऽहन् ९४ द्वया
ह प्राजापत्याः ९५ दृप्तबालाकिर्हानूचानो गार्ग्य आस ९६ जनको ह वैदेहः ९७ जनकं ह
वैदेहं याज्ञवल्क्यो जगाम ९८ पूर्णमदः पूर्णमिदं ९९ श्वेतकेतुर्ह वा आरुणेयः १०० अथ

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

प्रपाठकाः व्रतमुपैष्यन् १ चतुष्ट्यौविहितो ह वा अग्रेऽग्निरास २ देवाश्चार्द्राः स्तुः ३ सस्वचोनरमाथा
रमाचारयिष्यन् ४ यज्ञेनवैदेवाः ५ यज्ञेनवैदेवादिवमुपोदक्रामन् ६ स वै स्कन्धौ कृत्वा ति ७
सयज्ञाइनश्वेतस्य सम्भरति ८ वरुणो ह वैनद्राज्यकाममासदथे ९ अत्र वै प्रजापतिः प्रजाः ससृजे।
१० प्रजापतिर्देवाचतेनाग्रेयज्ञेनेजे ११ मह्यादवि ह्यार्ह वै दे वाव्रतंजज्ञुः १२ देवयजनं जोषया
न्ते १३ वाचंयच्छति १४ नीडे कृष्णाजिनमास्तृणाति १५ तद्यत्र पूर्वार्धे बर्हिष्ठ स्तृणाराजोभ
वति १६ द्विजामामोद्दैवास्पर्धिस्याः १७ पाशं कृत्वा प्रतिमुञ्चति १८ सोमं प्रपयजति १९ प्रा
णोदवा अस्यापांशुः २० आत्मा ह वा अस्यान्तर्यामः २१ अग्निर्वा एतस्य ग्रहाम् २२ स वा अवस्
थमभ्यवैति २३ तद्यत्रे तद्वादशाहेन व्यूढच्छन्दसा यजते २४ देवाश्च असुराश्च २५ वार्हस
त्येनचरुणा प्रचरति २६ स वा अपः सम्भरति २७ मैत्रावरुण्या पयस्यया प्रचरति २८ असद्वा
इदम् अग्र आसीत् २९ प्रजापत्यश्चरुस्स्या आलभते ३० यदीमा एतेऽग्नयो भवन्ति ३१ तस्यापतस्या
आषाढां पूर्वीकरोति ३२ रुक्मं प्रतिमुच्य बिभर्ति ३३ गार्हपत्यं चेष्यन् पलाशशाखया व्य
हूहति ३४ अथ दर्भस्तम्बमुपदधाति ३५ आत्मन्नग्निं गृह्णीते चेष्यन् ३६ कूर्ममुपदधाति
३७ प्राणभृत उपदधाति ३८ अथ विश्वज्योतिषमुपदधाति ३९ अथातोऽन्वाहृतम् ४० गार्हपा
त्यमुपदधाति ४१ अथातः शतरुद्रियं जुहोति ४२ अग्नेत्याग्निं प्रहरिष्यन् ४३ अथैतान्यजुरा
हुतीर्जुहोति ४४ अथ प्रातः प्रातरनुवाकमुपाकरिष्यन् ४५ अग्निरेष पुरस्ताच्चीयते ४६ अथा

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

तस्माद्यजमानस्यैव ४८ संवत्सरो वै प्रजापतिरग्निः ४९ नेव वा इदमग्रे सदासीन्नेवासदासीत् ५० संवत्स
रो वै यज्ञः प्रजापतिः ५१ अग्निर्देवा एतद्धि ५२ प्रजापतिर्वै प्रजाः सृजमानोऽमुत ५३ अथातः स्वा
ध्यायप्रशंसा ५४ अयं वै यज्ञो योऽयं पवते ५५ पुरुषो ह नारायणं प्रजापतिरुवाच ५६ सा
मो वै राज्ञा यज्ञः प्रजापतिः ५७ प्रजापतिर्यज्ञमसृजत ५८ ब्रह्मौदनं पचति ५९ निरुक्तो ह्युपांशु
शु ६० पुरुषस्याश्वं दक्षिणेन वेदिं ६१ पुरुषो ह नारायणोऽकामयत ६२ देवा ह वै सत्रं निषेदुः ६३
अथ यत्रैतां होतान्वाह ६४ द्वया ह प्राजापत्याः ६५ दृप्तो ह बालाकिरनूचानो गार्ग्य आस ६६ अ
थ हैनं भुज्युर्लाह्यायनिः पप्रच्छ ६७ जनको ह वैदेहो याज्ञवल्क्यं जगाम ६८ भूमिरन्तरिक्षं
द्यौरिति ६९ अथ यानि स्थानानि ब्रह्मोपेयात् १ तद्यदेवापिनष्टि २ अथाज्यलिप्तास्यापवित्रा
भ्यां ३ ब्रह्म वाचोपविष्टेति ४ ब्रह्मणां शंसतोऽस्यास ५ अग्निर्वै देवानामह्वातमो ६ तद्यथा
योनौ रेतः सिञ्चेत् ७ तां वै प्रागन्त्येव ८ अथ वेदपत्नीं च विसंसयति ९ अयं वै यज्ञो योऽयं पवते १०
अथ यदस्तमेति ११ रेवतीमध्यामिति १२ स वा अग्नेयोऽष्टाकपालः पुरोडाशो भवति १३ तद्येषा
मेनेजानाः १४ अथो मरुतां शालां परिश्रयन्ति १५ अथोल्लिखति १६ सा या बभ्रुः पिङ्गाक्षी सा
सोमक्रयणी स्यात् १७ ते देवाः १८ इडयोषः प्रोतातीवध स्वरादन्ते १९ सद्धाकद्रूरुवाच २०
तद्यदत उच्छिता देवा ह वै यज्ञं तन्वानाः २१ अथ पार्श्वेन वासिना वा प्रयौति २२ यत्र होतिष्ठा
त्वाग्निः समिधाहवं मऽइति २३ इयं ह वा उपांशुः २४ तस्मा सा वे वज्रवत्राणुः २५ यत्रा

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

५० द्यावापृथिव्यऽद्वाश्यते २६ सम्राज्यस्योपस्तीर्य द्विश्वरोरवयाति २७ इन्द्रो ह वै षोडशी २८ तास्सं
द्वादशाग्रभीः २९ तयैतत्सम्प्रराबाजपेयेन यजते ३० अथ दिक्षोत्तवीक्तमाग्नोजपति ३१ सवै
दीक्षते ३२ अथैतमभिषेकम् ३३ षडेवान्तरेचरवः ३४ यथोग्राहुः ३५ मावास्यायां दीक्ष
ते ३६ अश्वस्यपदे जुहोति ३७ अथैनां धूपयति ३८ तस्यपरि नाभिविभर्त्ति ३९ अथोखान्ति
वपति ४० चतस्रः सीतायजुषाकृषति ४१ तं प्रत्यञ्चयन्ति ४२ अपाङ्क्तमत्सीदेति ४३ त
स्यमनेविश्वकर्मन्तामिति ४४ तयैषामध्यमास्वयमातृण्णा ४५ एकादशाभिरस्तवतीति
४६ तावापतादषोष्टकाउपदधाति ४७ अथस्वयमातृण्णामुपदधाति ४८ अथोत्तरार्धे
नप्राक्व ४९ सयः सवैश्वानरः ५० यास्तेऽग्ने सूर्ये रुचः ५१ नामकृत्वाथैनमुपतिष्ठते ५२
यावाइयंवेदिः सप्तविधस्य ५३ अयमेवाकाशोग्नः ५४ सोयमात्मात्रेधाविहितएव ५५ ॥
अथ वृंहणाः ५६ अथ यामेतामाहुतिं जुहोति ५७ अथ यदत्रवाक्यामनूच्य ५८ ब्रह्मा
चार्यसीत्याह ५९ सयत्पशुबन्धेनयजते ६० दशातिहोवाच ६१ अथ यत्र स्कन्नं स्यात् ६२
अथ यदि प्रस्रुतः ६३ सर्वप्रायश्चित्तानि भवन्ति ६४ प्रजापतिर्यज्ञमसृजत ६५ किं वा वपनेमह
दिति ६६ अथ योस्यनिष्कः प्रतिमुक्तो भवति ६७ एतेनर्द्धिन्द्रोतो देवापः शौनकः ६८ चतस्रः
सीतायजुषाकृषति ६९ अथोत्तरतः सिकता उपकीर्णा भवन्ति ७० अथ वै दीक्षोर्जुहोति ७१
तेदेवा अब्रुवन् ७२ तानि यदा सृष्टानि ७३ योग्नीति ष्ठन् ७४ कतमश्रान्मेति ७५ अथ दैनं

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

मनुष्याऽज्जतुः १८ अथयामित्रेऽर्भन्दधीतेति ११ समसमनसूयनिषत्स्थानाति अथव्रतंविसृ
जते १ मयस्मिंहन्नावस्तंल्लोकमेति २ अथनिशाम्योग्रहान्विरहन्नाते ३ अथमहद्दूपतिःसब्र
ह्मणामाह्वायाति ४ तावाएनाः ५ तानिदशाभवति ६ ताऽएताऽअङ्गुलयः ७ मध्यमेवन्ह
तीयाविति: ८ सहोवाच ९ अथवर्ठषाः १० तस्माउदैतउवाच ११ सवाएषग्रात्मेवयन्तो
ग्रामणी १२ मर्यादायाएवलोष्टमाहृत्य १३ प्राश्नीपुत्रादासुरिवासिनः १४ एवव्रतंविसृजे
त १ परमांगतिङ्गच्छतीति २ तस्माद्धोत्चमसात् ३ तस्मिन्नस्मपदवासिष्टासमियोभ्योदय
ति ४ द्वादशावात्रयोदशावादक्षिणाभवन्ति ५ यावानग्निर्यावत्यस्यमात्रातावन्नङ्गवति ६ ता
स्मात्समानसमन्यता ७ तस्मादिमेप्राणाउपरिष्टादसञ्छन्नाः ८ संवादेनैवविजोलोकइति ९
ब्राह्मणोब्रह्मस्वयम्भ्वब्राह्मणोनमः १० कौशीनीरेवेमाप्राप्येतद्दिप्रजाजायन्ते ११ तस्माद्धिमावा
म्मानमभितोवाहू १२ तस्माउदैतजीवाश्यापितरश्चनसंहश्यन्ते १३ वाजसनेयेनयाज्ञवल्क्ये
नाव्याख्यायन्ते १४ **अग्निमीळे**पुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमं **इषेत्वोर्जेत्वा**
॰याहि २ अग्नआयाहिवीतयेगृणानोहव्यदातयेनिहोतासत्सिबर्हिषि ३ **शन्नोदेवी**रभि
ष्टयेआपोभवन्तुपीतये शंयोरभिस्रवन्तुनः ४ **इत्यध्ययनेसमाप्तं अथऋषिश्राद्ध**
मुपक्रमयते तत्रायंप्रकारः कृतशाणायामोदेशकालौसंकीर्त्यऽस्मर्गाङ्कभूते ऋषिश्राद्धम
हङ्करिष्ये ओंइदंविस्त्वितिदिग्बन्धः ऋषिश्राद्धोपहताःशुचयोभवन्तिवसुपदाबोधहन्तांदेश

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

कालपात्रद्रव्यश्रद्धासम्पदस्तु गोतमादिसप्तऋषीणामिदमासनं यथायथाविभागंवःस्वाहा
गोतमादयःसप्तऋषयोयथादत्तं गंधाद्यर्चनं यथाविभागंवःस्वाहा गन्धादिदानं ऋषिश्राद्ध
साङ्गतासिद्ध्यर्थं सप्तसंख्यकान् ब्राह्मणान् यथाकालेयथासम्पन्नान्नेनतर्पयिष्ये तेनगोत
मादयः सप्तऋषयःप्रीयन्तां ऋषिश्राद्धसांगतासिद्ध्यर्थंहिरण्यनिष्क्रयभूतांदक्षिणां मत
संप्रदिष्टामाचार्याय सम्प्रददे आचार्यःकोदादिति कामस्तुतिंपठेत् ॐकोदात्कस्माऽअदात्का
मोदात्कामायदात् कामोदाताकामःप्रतिगृहीताकामैतत्ते १ उपविष्टेषुब्राह्मणेषूदका
दिदानं तद्यथा ॐशिवाआपःसन्तु ॐसौमनस्यमस्तु अक्षतंचारिष्टंचास्तु अघोराःऋषयःसन्तु
सर्वत्रसन्त्विति विप्राःप्रतिवचनंदद्युः उत्सर्गकर्मणोन्यूनातिरिक्तादोषपरिहारार्थं नानागो
त्रेभ्यो नानाशर्मभ्योविप्रेभ्योभूयसींदक्षिणांसम्प्रददे अद्येत्यादिगुणविशिष्टे काले देशे।
च छंदसामुत्सर्गाङ्गभूतमृषिश्राद्धं परिपूर्णमस्तु अस्तुपरिपूर्णमितिविप्राः प्रतिवचनंद
द्युः ततःसह्यानोस्तु सहनोस्तु सहनौवतु सहन इदंवीर्यवदस्तु ब्रह्म इंद्रस्तद्वेदयेनयथान ।
विद्विषामहे इतिउभाकवीत्यस्य प्रजापतिऋषिः अश्विनौदेवते जपेविनियोगः उभाकवीयु
वायोनोधर्मः पराजतत् परिसख्यस्यधर्मिणोव्रिसख्यानिविसृजामहेइतिच सर्वेजपेयुः।
विरतास्मेति प्रब्रूयुः ततोऋषीन्विसर्जयेत् तत्रेयमुत्काविका ततोविसर्जनं कुर्युस्तदिष्ट।
ब्रह्मणस्पतइति उत्तिष्ठेतिचोरकण्वऋषिर्बृहतीछन्दः ब्रह्मणस्पतइति उत्तिष्ठेतिचोदका।

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

एवऋषिर्बृहतीछन्दः ब्रह्मणस्पतिर्देवता सप्तर्षिविसर्जनेविनियोगः ॐउत्तिष्ठब्रह्मणस्पतेदे
वयन्तस्त्वेमहे उपप्रयन्तुमारुतः सदानवः इन्द्रप्राशूर्भवासचा १ ततःसमाचारात्सप्तद्दं ग
च्छेति सप्तर्षीनजयाप्यायेत्लावयेत् ॐसमुद्रंगच्छस्वाहान्तरिक्षंगच्छस्वाहादेवंस ॥
॥ ॥ सवितारंगच्छस्वाहा मित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाछन्दांसि
गच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञंगच्छस्वाहासोमंगच्छस्वाहादिव्यन्नभोगच्छस्वा
हाग्निंवैश्वानरंगच्छस्वाहा मनोमेहार्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिः पृथिवीभस्मना॥
पृणस्वाहा स्वस्वप्रवरान्विसर्जयेत् एवमुत्सर्गंविधायत्रिरात्रंगुरुगृहे सर्वेशिष्यानिवसे
युः तत्रसूत्रं त्रिरात्रंसहोष्यविप्रतिष्ठेरन्निति सूत्रार्थः ततःसर्वेगुरुगृहेत्रिरात्रमुषित्वा
स्वस्वगृहे गच्छेयुः अन्यच्च त्रिरात्रं नाधीयीरंल्लोमनखानामनिकृन्तनञ्च सूत्रार्थः उत्सर्गा
नंतर त्रिरात्रमध्ययनेनकुर्युः तथानखलोम्नांनिकृन्तनञ्च एकेषामुत्सर्गात् एवंप्रकारेणो
दगुत्सर्गाख्यंकर्मप्रतिवर्षमनुष्ठेयं नित्यत्वात् तथाचकात्यायनः प्रत्यब्दंयदुपाकर्मसोत्स
र्गं विधिवद्द्विजैः क्रियतेछन्दसांतेनपुनराप्यायनंभवेत् १ अस्थानोच्छ्वासविच्छेदघोष
णाध्यायनादिकं कृतंयत्स्यायतयामत्वकारितत् २ अयातयामैश्छन्दोभिर्यत्कर्मक्रिय
तेद्विजैः क्रीडमानैरपिसदातत्तेषांसिद्धिकारकमिति ३ उत्सर्गोत्तरंपुनरुपाकरणंयाव
च्छुक्लकृष्णव्यवस्थयामन्त्रब्राह्मणयोरध्ययनं अङ्गानांच तदुक्तंमिताक्षरायां यथाशास्त्रं

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

न्ते कृत्वैवमुत्सर्गं छन्दसां बहिः विरमेत्पक्षिणीं रात्रीं यद्वाप्येकमहर्निशामिति अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् वेदाङ्गानि तु सर्वाणि कृष्णपक्षेषु सम्पठेदिति तत्र शुक्लेषु छन्दांसि कृष्णपक्षेष्वङ्गानीति विवेकः समूलत्वादयमेव पक्षः श्रेयस्करः वनस्थोऽपीदं कुर्वीत तदुक्तं श्रयोगपारिजाते उपाकर्मोत्सर्जनञ्च वनस्थानामपीष्यते धारणाध्ययनाङ्गत्वाद्गृहिणां ब्रह्मचारिणामिति उत्सर्गाकरणे दोषः श्रूयते उत्सर्जनञ्च वेदानामुपाकर्म तथैव च अकृत्वा वेदाजाप्येन फलमाप्नोति मानवः सूत्रकारिकयोर्भाष्यं विलोक्य पद्धतिः कृता कर्मदत्तोपाध्यायकान्तदेवद्विजन्मना

इति श्रीमन्महाराजाधिराजरणवीरसिंहभू
पालाज्ञप्तजनार्दनसंगृहीतपारस्करसूत्रा
नुसारी पद्धतिः समाप्तिमगमत् ॥ ॐ ॥

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

ॐ श्रीगणेशाय नमः अथातोऽध्यायोपाकर्म अध्ययनमध्यायः तस्योपाकर्म स्वी
कारः इति सूत्रशेषः एतच्चाकृतावसथ्यस्याध्यापनप्रवृत्तस्य भवति अपरेत्व अध्यापनप्रवृत्त
स्यानिरग्नेरपि लौकिकाग्नौ भवतीत्याहुः अनौपासनिकस्योपाध्यायस्यायमेव विशेषो लौ
किकाग्नाविति गर्गपद्धतौ हरिहरभाष्येऽपि छन्दोगपरिशिष्टे कात्यायनः नखेग्नावन्यहोमः
स्यान्मुक्त्वैकां समिदाहुतिम् स्वगर्भसंस्क्रियार्थाश्च यावन्नासौ प्रजायतेऽइति तेनावसथ्यामा
वुपाकर्म भवतीति गम्यते तेनाध्यापयतोऽपि निरग्नेः साग्नेरनध्यापयतोऽनधिकारः यत्तु लोके
ब्रह्मचारिणां गृहस्थानाम् उपाकर्म प्रवर्तते लौकिकाग्नौ तस्याचारं विहाय मूलं न दृश्यते अत्र पूर्व
जानां शिष्टाचारमङ्गीकृत्य कर्तव्यं अस्य लोपो न कर्तव्यः अथातोऽध्यायोउपाकर्मप्रयोगः पा
दौ प्रक्षाल्य द्विराचमनं आवसथ्याग्नेः पश्चात्तल्पाशिष्यः सदर्भप्राङ्मुखउपविश्य आवसथ्ये ।
ऽग्निं परमथित्वा तत्र यवान् प्रक्षिप्य परस्याथः प्रज्वाल्य यवानां भर्जनं ते यवा धानाः आव
सथ्याभावे हृष्टोदिविविधानसिद्धाग्नेः पश्चादित्यादि तदभावे ग्राम्याग्निस्थापनं तद्यथा अद्य
तिथौ अध्यायोपाकर्मणि पंचभूसंस्कारपूर्वकमग्निस्थापनमहं करिष्ये दर्भैः परिसमूह्य
गोमयोदकेनोपलिप्य स्रुवेणोल्लिख्य अनामिकाङ्गुष्ठेनोद्धृत्य उदकेनाभ्युक्ष्य अग्निमुपसमा
धाय अग्नेः पश्चात्तल्पाशिष्यैः सदर्भप्राङ्मुखउपविश्य अग्नौ परमथित्वा तत्र यवान् प्र
क्षिप्य परस्याथः प्रज्वाल्य यवानां भर्जनं ते यवा धानाः ग्रहः प्राणायामत्रयं कालज्ञानं

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

६६ कृत्वा श्रीपरमेश्वरप्रीतये अध्यायोपाकर्माहं करिष्ये वैकल्पिकपदार्थविचारणां कुर्यात् तत्र
पौर्णमास्यामपर्पकर्म पूर्ववैलाब्राह्मणोपगमनं अग्नेरुत्तरतः पात्रासादनं द्वेपवित्रे ताम्रमयी आज्य
स्थाली पालाशः समिधः आघारावाघारौ समिद्धतमे आज्यभागौ तिलहोमः सावित्री मन्त्रेण पू
र्णपात्रं दक्षिणा त्रिरात्रं लोमनखानामनिकृन्तनं एतान् वैकल्पिकपदार्थानहं करिष्ये । ऋ
षिच्छन्दे देवतास्मरणं इषेत्वेत्यादिकस्य खं ब्रह्मान्तस्य माध्यंदिनीयस्य वाजसनेयकस्य यजु
र्वेदाम्नायस्य विवस्वान् ऋषिः वायुर्देवता गायत्र्यादीनि सर्वाणिच्छन्दांसि अध्यायोपाकर्मा
णि विनियोगः देवताभिध्यानम् तत्र प्रजापतिं इन्द्रम् अग्निम् सोमम् पृथिवीं अग्निं ब्रह्मा
णं छंदांशसि अन्तरिक्षं वायुं ब्रह्माणं छंदांशसि दिवं सूर्यं ब्रह्माणं छन्दांशसि दिशः च
न्द्रमसं ब्रह्माणं छन्दांशसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां सदसस्पतिं अनुमतिं एता
प्रधानदेवता आज्येन सदसस्पतिं धानाभिः सवितारं तिलैः अग्निं स्विष्टकृतमन्वाधानाघारेण अ
ग्निं वायुं सूर्यं अग्निवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान् मरुतः स्वर्कान् वरुणं
प्रजापतिं एताश्चाङ्गप्रधानार्था देवता अस्मिन्कर्मण्यहं यक्ष्ये दक्षिणतो ब्रह्मासनमास्तीर्य देवद
त्तशर्मन् कर्मणि त्वं ब्रह्मा भव भवामीति प्रतिवचनं इति ब्रह्मवरणं ब्रह्माद्यसी आसनावलोकने
आसनात्तृणानि निरसनं च कृत्वा उपविशेत् अग्नेरुत्तरतः प्रणीतार्थमासनद्वयं निधाय प्रणीता
चमसं वामहस्ते कृत्वा आत्माभिमुखं जलेनापूर्य ब्रह्म आसने निधाय चमसदक्षिणभागे ब्रह्मा

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

णमवलोक्य तेन सङ्केतादिनाऽऽहृतान् प्रणीय उत्तरासनेनिदध्यात् ततउदगग्रैः प्रागग्रैश्च कुशै
रग्निं परिस्तीर्य अर्थवदासाद्य अग्नेरुत्तरतः प्राक्संस्थमुदक्संस्थं वा पात्रासादनम् पवित्रच्छेद
नार्थं दर्भास्त्रयः पवित्रे द्वे प्रोक्षणीपात्रं आज्यस्थाली संमार्गकुशास्त्रिप्रभृतयः उपयमनकुशाः
सप्तप्रभृतयः समिधस्त्रिप्रभृतयः स्रुवः आज्यं धानाः पूर्णपात्रञ्च अथोपकल्पनीयानि प्र
तिशिघ्रं नवनवसमिध आर्द्राः सपत्राश्चोर्द्ध्वं वरस्य दधिमध्वार्थे लौकिकाधानाः वाह्नमात्रसेतुं
वरकाष्ठन्तिलस्थापनस्थाने सर्षपफणाकारमाकार्षफलकं तिलाश्चेति पवित्रकरणं द्वयोरुपरि
त्रीणि निधाय द्वाभ्यां मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य सर्वानग्रपर्ज्ञत्वा अनामिकाङ्गुष्ठाभ्यां छित्वाता
उत्तरतः क्षिपेत् प्रोक्षणीपात्रं प्रणीतोत्तरतो निधाय प्रोक्षणीपात्रे पात्रान्तरेण प्रणीताद्भिः स्वाः
सां प्रोक्षणं सपवित्रहस्तेनोत्तानेन पात्रप्रोक्षणं आज्यस्थाल्याः प्रोक्षणं संमार्गकुशानां प्रोक्ष
णं उपयमनकुशानां प्रोक्षणं समिधां प्रोक्षणं स्रुवस्य प्रोक्षणं आज्यस्य प्रोक्षणं धानानां प्रोक्ष
णं पूर्णपात्रस्य प्रोक्षणं प्रणीताग्न्योर्मध्येऽसञ्चरे प्रोक्षणीं निधाय कुशोपग्रहेण आज्यस्थाल्या
माज्यनिर्वापः आज्याधिश्रयणं ततोज्वलदुल्मुकेन पर्यग्निकरणं इतरथावृत्ति अर्थश्रितेस्रु
वं प्रतप्य संमार्गकुशैः संमृज्य अग्रैरग्रानाधारभ्याग्रपर्यन्तं मूलैर्याधारभ्य मूलपर्यन्तं प्रणी
तोदकेनाभ्युक्ष्य पुनः प्रतप्य दक्षिणतो निदध्यात् आज्यमुद्वास्य उत्तरतो निधाय ततोऽग्रेः पा
श्चिमतो निदध्यात् पवित्राभ्यामाज्यमुत्पूय प्रोक्षणीमपूर्ववदुत्पूय आज्यमवेक्ष्य अपद्रव्याणि

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

६५ रक्तं ने उपयमनकुशानादाय तिष्ठन्समिधोऽभ्याधाय प्रोक्षण्युदकशेषेण सपवित्रेणाद्धस्ते
नेशानमारभ्येशानपर्यन्तं प्रदक्षिणमग्निं पर्युक्ष्य इतरथावृत्तिः पवित्रयोः प्रणीतासु निधा
नं सोपयमनकुशसव्यहस्तस्त्वन्तानेहृदि निधाय दक्षिणजान्वनिपातः ब्रह्मणान्वारब्धः दक्षिणह
स्तेन स्रुवेणहोमः मनसा ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम यग्नान्तेद्रव्यप्रक्षेपः
प्रोक्षणीपात्रे संस्रववधारणं ॐ इन्द्राय स्वाहा इदं० ॐ अग्नये स्वाहा इदं० ॐ सोमाय स्वाहा इदं०
ऋग्वेदे ॐ पृथिव्यै स्वाहा इदं० ॐ अग्नये स्वाहा इदं० ॐ ब्रह्मणे स्वाहा इदं० ॐ छन्दोभ्यः स्वाहा
इदं० यजुर्वेदे ॐ अन्तरिक्षाय स्वाहा इदं० ॐ वायवे स्वाहा इदं० ॐ ब्रह्मणे स्वाहा इदं० ॐ
छन्दोभ्यः स्वाहा इदं० सामवेदे ॐ दिवे स्वाहा इदं० सूर्याय० इदं० ब्रह्मणे० इदं० ॐ छन्दो
भ्यः० इदं० अथर्ववेदे ॐ दिग्भ्यः० इदं० चन्द्रमसे० इदं० ब्रह्मणे इदं० छन्दोभ्यः० इदं०
प्रजापतये० इदं० देवेभ्यः इदं० ऋषिभ्यः इ इदं० श्रद्धायै० इदं० मेधायै० इदं० सदस
स्पतये० इदं० अनुमतये० इदं० एताः सप्तविंशत्याहुतय आज्येन ततः शोधितया नाभिधा
रणं स्रुवेणाज्यमादाय सदसस्पतिमद्भुतमित्यनेन मन्त्रेणाग्नौ जुहुयात् ॐ सदसस्पतिमद्भु
तं प्रियमिन्द्रस्य काम्यम् सनिं मेधामयासिषं स्वाहा इदं इमं मन्त्रं गुरुणा पठ्यमाने शि
ष्या अपि सहानुपठेयुः ततः उदुम्बरसमित्त्रितयमभिघार्य हस्ते गृहीत्वा उत्थाय पादस्थोत्सि
ष्ठन्तः तस्याविना० स्वाहा इदमग्नये न मम इत्युच्चार्य एकां समिधमादध्युः एवं मन्त्रेणाहितं

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri

यात् यथाज्जतीयां ततः सर्वैरुपविश्येषु आचार्यः पुनः स्रुवेणाधानाग्रवधाय द्वितीयाधानाहुतिं
पूर्ववत् इदं ततस्तिस्रोपराः समिधो हुतेनाभ्युज्य उत्थाय प्राङ्मुखोस्तिष्ठन् तत्सवितु० स्वा
हा इत्यन्त्यार्थपक्वां समिधोभ्यामादध्युः एवं द्वितीयां तथा तृतीयां पुनराचार्यो धानाहुतिं जुहु
यात् इदं सद० मन्त्रानुपठनेशिष्याणामपि समिधत्रयं पूर्ववज्जुहुयात् ब्रह्मचारीत्वशिष्यो
ऽस्यहवग्निकार्यक्रमेणसमिदाधानेकुर्यात् न सावित्र्या अयत्सर्वे समाने ततो याउपकल्पि
ताधानास्तिस्रस्तिस्रो गृहीत्वा ॐ घान्नोभवन्त्विति मन्त्रेण दन्तैरखादन्तः प्राश्नीयुः द्विराचम
ने ॐ दधिक्राव्णो० इति मन्त्रेण दधि भक्षेयुः द्विराचमने तत आचार्यो याजन्शिष्यगणं
आत्मन इष्ठेनावनलिलानाराणयित्वा आकर्षफलकेनावदाय स्रुवज्योतिरित्यनुवाकेन सा
वित्र्यावाजुहुयात् ॐ तत्सवितु० दयात् स्वाहा इदं सवित्रे० संस्रवप्रक्षेपः ततो याज्यमः
स्विष्टकृत् ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते भूराद्यानवाहुतय आज्येन जुहुया
त् सर्वत्र याग्यान्ते द्रव्यप्रक्षेपः संस्रवप्राशनं आचमनं पवित्राभ्यां मार्जनं अग्नौ पवित्रप्रति
पत्तिः ब्रह्मणो पूर्णपात्रदानं तद्यथा ब्रह्मन् अस्योपाकर्मणो यत्र याविद्धिं पूर्णपात्रं प्रति
गृह्यते ॐ द्यौस्त्वा ददातु इति मन्त्रस्य ब्रह्मणो जपः प्रणीताविमोकः ततोग्निसन्निधौ रेखाकृष्ट
प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुखः आचार्यः ओंकारमुक्त्वा त्रिः सावित्री मन्त्रं ब्रूया
त् यथा ॐ तत्सवितु० दयात् इषेत्वादि ईशावास्यमन्तं व्रतमुपेष्यामीत्यादि सर्वं मन्त्रब्रा

CC-0 Residence of Asif Sahib Pulwama. Digitzed by eGangotri